IMPACT FACTOR : 2.905
ISSN : 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका
Half Yearly Peer Reviewed Sanskrit Research Journal
Vol. XII October, 2019 - March, 2020 Issue No. 2
वर्षम् १२ अक्टूबर २०१९ - मार्च २०२० अङ्कः द्वितीयः

# प्राचीसुधा

# PRACI SUDHA

**A NATIONAL PEER REVIEWED HALF-YEARLY SANSKRIT RESEARCH JOURNAL**

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

सम्पादकः सञ्चालकश्च
प्रो. विश्वनाथस्वाईँ

सहसम्पादकाः
डॉ.युधिष्ठिरसाहुः
डॉ. विघ्नेश्वरमिश्रः

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा
PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY
SARVODAYA NAGAR, PURI - 752002, ODISHA

Website : www.pracisudha.in

PRACI SUDHA ISSN 2249 - 2313
AN INTERNATIONAL REFERRED HALF-YEARLY SANSKRIT RESEARCH JOURNAL

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्
Purusottam Research Academy of Indology
Sarvodaya Nagar, Puri - 752002 (Odisha) Ph. 06752-250588
E.mail: biswanathpuri@yahoo.com Pracisudha2013@gmail.com

**संरक्षका:**
श्रीमहन्त: डॉ.वृन्दावनविहारिदासकाठियाबाबामहाराज:, सुखचर: कोलकाता
श्रीमहन्त: श्रीरामकृष्णदासमहाराज:, पुरी
श्रीमहन्त: श्रीश्रीनिवासदासमहाराज:, पुरी
त्रिदण्डी स्वामी भक्तिस्वरूपश्रीधरमहाराज:, पुरी
स्वामी श्रीत्र्यम्बकेश्वरमहाराज:, काशी

**परामर्शदातृमण्डलम्**
प्रो.अलेखचन्द्रषडङ्गी(पूर्वकुलपति:), प्रो.अद्वैतचरणधल:,
महामहोपाध्याय: द्वारिकानाथत्रिपाठी, प्रो.गङ्गाधरपण्डा(पूर्वकुलपति:),
प्रो.प्रफुल्लकुमारमिश्र:(पूर्वकुलपति:), प्रो.चन्द्रशेखरमिश्र:,
प्रो.विन्ध्येश्वरप्रसादहिमांशु:, प्रो.ललितकुमारसाहु:, श्रीज्ञानेन्द्रत्रिपाठी,
डॉ.पूनमलखनपाल, प्रो.नागवरप्रसाद राव चन्द्रपाटी,

**पुनरीक्षणसमिति: (PEER REVIEW COMMITTEE)**
महामहोपाध्याय: प्रो.सुधाकराचार्यत्रिपाठी, चौ.च.वि.वि., मेरठ (यू.पी.)
प्रो.विक्रमकुमार:, पञ्जावविश्वविद्यालय:, चण्डीगड़
प्रो.सरोजकौशल:, जयनारायणव्यासविश्वविद्यालय:, जोधपुर (राजस्थान)
प्रो.कमलेश सि चोक्सि, अहमदाबादविश्वविद्यालय:, अहमदाबाद (गुजरात)

**सम्पादकमण्डलम्**
प्रो.प्यारीमोहनपट्टनायक:, प्रो.हरेकृष्णमहापात्र:,
प्रो.सूर्यमणिरथ:, डॉ.कान्हुचरणपण्डा, डॉ.निर्मलापाणिग्राही, डॉ.शत्रुघ्नपाणिग्राही
प्रो.प्रभातरञ्जनमहापात्र:, डॉ.वसन्तकुमारमिश्र:, प्रो.विश्वनाथस्वाईँ

**सम्पादक: सञ्चालकश्च**
प्रो.विश्वनाथस्वाईँ

**सहसम्पादका:**
डॉ.युधिष्ठिरसाहु
डॉ. विघ्नेश्वरमिश्र:

ISSN 2249 - 2313

## पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानस्य प्रतिष्ठातृसदस्या:

**क्र.सं.　　सदस्यानां नामानि, सङ्केताश्च**

१.　प्रो.डॉ.विश्वनाथस्वाईँ(प्रतिष्ठाता, महासचिव:), सेवानिवृत्त: प्राचार्य:, श्रीज.वे.क.म., पुरी, ओडिशा
२.　प्रो.प्यारीमोहनपट्टनायक:, श्रीज.सं.वि.वि., पुरी, ओडिशा
३.　प्रो.अद्वैतचरणधल:, श्रीज.सं.वि.वि., पुरी, ओडिशा
४.　प्रो.अलेखचन्द्रषडङ्गी, पूर्वकुलपति:, श्रीज.सं.वि.वि., पुरी, ओडिशा
५.　प्रो.सूर्यमणिरथ:, रा.सं.सं., श्रीसदाशिवपरिसर:, पुरी, ओडिशा
६.　डॉ.कान्हुचरणपण्डा, रा.सं.म.वि., ब्रह्मपुरम्, गञ्जाम, ओडिशा
७.　श्रीज्ञानेन्द्रत्रिपाठी, वालिचन्द्रपुर, याजपुर, ओडिशा
८.　प्रो.हरेकृष्णमहापात्र:, रा.सं.सं., श्रीसदाशिवपरिसर:, पुरी, ओडिशा
९.　प्रो.गौरप्रियादास:, रा.सं.सं., श्रीसदाशिवपरिसर:, पुरी, ओडिशा
१०.　प्रो.प्रभातरञ्जनमहापात्र:, श्रीज.सं.वि.वि., पुरी, ओडिशा
११.　श्रीविश्वमोहनमहारणा, पुरी, ओडिशा
१२.　डॉ.शत्रुघ्नपाणिग्राही, श्रीसोमनाथ सं.वि.वि., वेरावल, गुजरात
१३.　प्रो.रघुनाथपण्डा, उत्कलविश्वविद्यालय:, भुवनेश्वरम्, ओडिशा
१४.　प्रो.ललितकुमारसाहु:, रा.सं.सं., श्रीसदाशिवपरिसर:, पुरी, ओडिशा
१५.　डॉ.वसन्तकुमारमिश्र:,श्रीजगन्नाथसंस्कृतविश्वविद्यालय:, पुरी, ओडिशा
१६.　प्रो.विक्रमकुमार:, पञ्जाब-विश्वविद्यालय:, चण्डीगढ, पञ्जाब
१७.　प्रो.गङ्गाधरपण्डा, कुलपति:, श्रीज.सं.वि.वि., पुरी, ओडिशा
१८.　प्रो.चन्द्रशेखरमिश्र:, ला.व.सा.स्मा.म.वि.आनन्दनगर, महाराजगञ्ज,यू.पी.
१९.　डॉ.युधिष्ठिरसाहु:, रेभेन्सा-विश्वविद्यालय:, कटक, ओडिशा
२०.　प्रो.अनुपमापृष्टि:, रा.सं.सं., श्रीसदाशिवपरिसर:, पुरी, ओडिशा
२१.　डॉ.नरेशचन्द्रदाश:, नी.ना.आ.चतुष्पाठी म.वि., पुरी, ओडिशा
२२.　श्रीहृषीकेशदाश:, ब्रह्मपुरम्, गञ्जाम, ओडिशा
२३.　प्रो.प्रफुल्लकुमारमिश्र:, कुलपति, उत्तरओडिशा वि.वि., मयूरभञ्ज, ओडिशा
२४.　डॉ.देवराजपाणिग्राही, त्रिपुराविश्वविद्यालय:, अगरताला, त्रिपुरा
२५.　डॉ.पूर्णचन्द्रपाढी, श्रीज.सं.वि.वि., पुरी, ओडिशा
२६.　डॉ.भारतेन्दुपाण्डेय:, दिल्लीविश्वविद्यालय:, दिल्ली
२७.　प्रो.एम्.वसन्ता, एस्.एस्.यु.एस्., कोइलाण्डी, केरल
२८.　आचार्य: रामस्वरूपशास्त्री, राजकीयसंस्कृतमहाविद्यालय:, ग्वालियर्, म.प्र.
२९.　प्रो.छायारानी, दी.द.उ.गोरखपुरविश्वविद्यालय:, गोरखपुर, यू.पी.
३०.　डॉ.जयन्तकुमारत्रिपाठी, गङ्गाधरमेहेरकॉलेज्, सम्बलपुर, ओडिशा
३१.　प्रो.सङ्गीता अग्रवाल, आर्यकन्या पी.जी.कॉलेज, हापुड, यू.पी.
३२.　प्रो.नागवरप्रसाद राव चन्द्रपाटी, रा.सं.सं., श्रीसदाशिवपरिसर:, पुरी, ओडिशा
३३.　डॉ.मेधा कुमारी, संस्कृतविभाग:, सामसीमहाविद्यालय:, सामसी, प.ब.
३४.　डॉ.विष्णुप्रसाददाश:, संस्कृतविभाग:, पात्रसायरमहाविद्यालय:, प.ब.
३५.　प्रो.पूनमलखन पाल, रघुनाथ-कन्या पीजी कॉलेज्, मेरठ, यू.पी.
३६.　डॉ.निर्मला पाणिग्राही, शिक्षाशास्त्रविभाग:, रा.सं.सं., श्रीसदाशिवपरिसर:, पुरी, ओडिशा

.............................. अवशिष्टांश: - ९९ पृष्ठाङ्के

**PRACI SUDHA ISSN 2249 - 2313**

**AN INTERNATIONAL REFERRED HALF-YEARLY SANSKRIT RESEARCH JOURNAL**

**पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्**

**Purusottam Research Academy of Indology**

**Sarvodaya Nagar, Puri - 752002 (Odisha) Ph. 06752-250588**

**E.mail: biswanathpuri@yahoo.com Pracisudha2013@gmail.com**



## सम्पादकीयम्

ॐ "महो अर्ण: सरस्वती प्र चेतयति केतुना ।
धियो विश्वा वि राजति ।।" इति मधुच्छान्दा वैश्वामित्र: ।

बुद्धिजीवी मनुष्य: जन्मजन्मान्तरविश्वासी कर्मयोगी । सततं नित्यानन्दप्राप्त्यर्थं तस्य अभिलाष: । इह संसारे तस्य कृते अनेकानि कर्त्तव्यकर्माणि । तेषु –

"स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतै: ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनु: ।।"

इत्यादीनि सर्वज्ञानमय-मनुप्रोक्तानि विशिष्टानि । स्वाध्यायाद्यभ्यासद्वारा शरीरावच्छिन्न आत्मा नित्यानन्दप्राप्त्यनुकूलो भवतीत्यर्थ: ।

"द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णात: परं ब्रह्माधिगच्छति ।।
परया त्वक्षरप्राप्ति:" । इत्यत्र स्मृति: ।

अधीतिबोधाचरणप्रचारणै: स्वाध्यायाभ्यास: सम्पाद्यते । अत: "स हि बन्धुरित्था", "अन्त:प्रविष्ट: शास्ता जनानाम्", "एष एव साधु कर्म कारयति यमेतेभ्यो लोकेभ्य ऊर्ध्वं निनीषते" चेत्यादि श्रुतेश्च कर्मबन्धना: अथ च सचेतना: विद्वांस: सर्वानन्द-सर्वशक्तिप्राप्त्यनुकूले एतस्मिन् ब्रह्मयज्ञरूपे सुकृतकर्मणि स्वाध्याये प्रवृत्ता: दृश्यन्ते । एतेषां सुहृदां विदुषां सरसा सालङ्कारा मनोवाणी अत्र अधुना "**प्राचीसुधा**" संस्कृतशोधपत्रिकायां "राधाधारा नैम्बार्का:", "विष्णुपुराणे निम्बार्कविचारधारा", भारतीयदर्शनेषु निम्बार्कदर्शनम्", "श्रीमद्भागवते अर्थागमस्वरूपविमर्श:", "वेदेषु नारी"चेत्यादिशोधलेखेषु प्रस्फुटिता भवतीत्यत्र प्रमोदविषय: ।

सुखसञ्चारे नवनवप्रतिभासम्भारे प्रोक्ता: विचारधारा: अत्र **अन्ताराष्ट्रियमूल्याङ्कितायां पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानस्य षाण्मासिकि-संस्कृतशोधपत्रिकायां प्राचीसुधायां** रमन्ते । "प्राचीसुधा"-संस्कृतशोधपत्रिकाया: अयं एकविंशतितमबिन्दु: (वर्षम्-११, अङ्क: -१, अप्रेल-२०१८ – सितम्बर-२०१८) । प्रकाशनमिदं सर्वजनहृद्यं भवेदिति ।

विदुषां वशंवद:

**श्रीजगन्नाथपुरी**
**०२.१०.२०१८**
**(गान्धिजयन्ती)**

**प्रो.विश्वनाथस्वाईं**
**सम्पादक: सञ्चालकश्च, प्राचीसुधा**
**तथा च महासचिव:,**
**पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा**

PRACI SUDHA ISSN 2249 - 2313
AN INTERNATIONAL REFERRED HALF-YEARLY SANSKRIT RESEARCH JOURNAL
एकादशवर्षम् द्वितीयसंख्या

# विषयसूची


| विषयाः | लेखकाः | पृष्ठाङ्काः |
|---|---|---|
| सम्पादकीयम् | प्रो.विश्वनाथस्वाइँ | ३ |
| Declaration | | १०० |

# अष्टाध्यायीसूत्रसङ्ख्याकानुचिन्तनम्

डॉ. युधिष्ठिरसाहुः

भावप्रकाशस्य माध्यमो भवति भाषा । भाषाया अनुशासकग्रन्थविशेषस्य नाम भवति व्याकरणम्। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणमिति व्याकरणशब्दस्य व्युत्पत्तिः । वि + आ + कृ + ल्युट् अनुबन्धलोपे 'युवोरनाकौ' (७/१/१) सूत्रेण 'यु' इत्यस्य स्थाने 'अन' आदेशे वर्णसंयोगे व्याकरणपदं निष्पद्यते।

विश्वेऽस्मिन् भाषासंख्या निर्दिष्टा नास्ति । परन्तु सरला मञ्जुला सरसा सर्वहृदि प्राणविनोदिनी भाषा भवति संस्कृतभाषा । यस्याः स्वतन्त्रं विज्ञानसिद्धं सुमहत् व्याकरणं दृश्यते । संस्कृतवाङ्मये यद्यपि अनेकेषां व्याकरणशास्त्राणि भवन्ति। तथापि लौकिकानां वैदिकानां भाषाणां पूर्णरूपेण सर्वेषां पदानामनुशासनकर्तुं न पाणिनीव्याकरणान्तरं किमपि व्याकरणान्तरमर्हति तस्मात् संस्कृतव्याकरणम् अर्थात् पाणिनीयव्याकरणं सर्वादृतं सुप्रसिद्धं चास्ति । पाणिनिकृतव्याकरणस्य सूत्रग्रन्थस्य नाम 'अष्टाध्यायी' सुप्रसिद्धा । ततः तं ग्रन्थमाधारीकृत्य वार्तिक-भाष्य-प्रक्रियादीनां ग्रन्थानां विकासः सञ्जातः । अष्टाध्याय्यां केवलं सूत्राणि निर्दिष्टानि । तत्रस्थ सूत्रसंख्याविषये किञ्चिद् विवादः वर्तते । तस्य परिसमाप्त्यर्थं शोधप्रबन्धोऽयं गृहीतः।

(क) महर्षिपतञ्जलि महाभाष्ये व्याकरणस्य लक्षणनिरूपणावसरे व्याकरणं नाम 'सूत्र'मित्युक्तम्। लक्षलक्षणे व्याकरणमित्यादि भावेन विविधां शङ्कामुत्थाप्य परिशेषे व्याकरणं नाम सूत्रमिति विविक्तम्। सूत्रपदेन समुदायरूपतायाः व्यवहारदृष्टेऽपि शब्दानामात्यन्तात् तदर्थं प्रतिपादकशास्त्रस्य बृहच्छङ्का दूरीकरणाय सूत्रात्मकेन लघुनोपायेन पाणिनिः अष्टाध्यायीं रचितवान्।

**सूत्रलक्षणम्/ निष्पत्तिः –**

'सूत्र अर्थात् ग्रन्थने'[१] इति कविकल्पद्रुमः (अदन्त चूरा.पर.सक.सेट्) दीर्घी दन्त्यवर्गाद्यमध्यः। वेष्टने इत्यर्थः सूत्रयति सूत्रापयति सूत्रेण हसलोक इति दुर्गादासः ।

सूत्रम् इति क्लीबलिङ्गो तु सूत्रातेऽनेनेति । सूत्रात् क् ग्रथने+णिच्+ए रच् इत्यच् = सूत्रम् यस्य अर्थः तन्तु सन्ताने वस्त्रारम्भकमिति सूत्रलक्षणमुच्यते तावत्-

अल्पाक्षरमसन्दिग्धं सास्वद्विश्वतो मुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ।।[२]

संक्षेपेण सङ्केतवचनमित्यर्थः बोधव्यः । किम्बदन्त्यनुसारं माहेश्वरसूत्रप्राप्तात्परमेव महर्षिपाणिनिना समग्रसूत्राणि प्रणितानि । तस्मादुच्यते महेश्वरादागतानि इति । महेश्वरप्रसादलब्धानि महेश्वरसूत्राणि यानि अधिकृत्य अष्टाध्यायी विरचिता तस्मादुच्यते–

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।।[३]

अपि च – नृतावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धात् नेतदत्तद्विमर्शे शिवसूत्रजालम् ।।[४]

**सूत्रभेदाः –**

सूत्रस्य भेदाकलनेनोच्यते–

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधसूत्रलक्षणम् ।।

सूत्राणि षड्विधानि सन्ति । यथा–

| | | | |
|---|---|---|---|
| १. | संज्ञा | २. | परिभाषा |
| ३. | विधिसूत्रम् | ४. | नियमसूत्रम् |
| ५. | अतिदेशसूत्रम् | ६. | अधिकारश्च |

एतेषां षड्विधानां सूत्राणामपि लक्षणं दीयते । तथा–

१. संज्ञा– नामकरणं संज्ञा – उदा. 'अचोऽन्त्यादि टि' इति टिसंज्ञा ।[५]

२. परिभाषा – अनियमे निमकारिणी परिभाषा – उदा. 'स्थानेरन्तरतमः' ।[६]

३. विधिसूत्रम्– कर्तव्यत्वेनोपदेशो विधिः – उदा. 'इको यणचि' ।[७]

४. नियमसूत्रम्– बहुत्रप्राप्तौ सङ्कोचनः नियमः – उदा. 'षष्ठी शेषे' ।[८]

५. अतिदेशो– अन्यतुल्यतो विधानमतिदेशः – उदा. 'स्थानिवदादेशोऽनल्विधौ'।[९]

६. अधिकारः – उत्तरप्रकरण्यापि अधिकारः – उदा. 'कारके...' ।[१०]

अष्टाध्यायीपठनेन निम्नोक्तदिशा उपर्युक्तश्रेण्यां सूत्राणां संख्या संप्राप्यते–

| | | | |
|---|---|---|---|
| १. | संज्ञासूत्राणां संख्या | – | ७० |
| २. | परिभाषा सूत्राणां संख्या | – | ५० |
| ३. | विधिसूत्राणां संख्या | – | ३५९५ |

४. नियमसूत्राणां संख्या – ८२
५. अतिदेशसूत्राणां संज्ञा – १०९
६. अधिकारसूत्राणां संख्या – ७५

——————————

३८९१+१०४ = ३९९५

एतैः साकं माहेश्वरसूत्राणां ग्रहणेन सम्पूर्णसूत्रसंख्या – ३९९५

अपरेण विदुषां नये निम्नोक्तभावे अष्टाध्याय्याः सूत्रसंख्या भिन्नाः भिन्नाः सन्ति । यथा–

१. काशिकावृत्त्यनुसारम् अष्टाध्यायीसूत्रसंख्या – ३९८३
२. गोल्डष्टकरमहोदयानां नये – ३९९६ ।[११]
३. मोनियरविलियमस्–महोदयानां मतेन – ३९९२ ।[१२]
४. तारानाथतर्कवाचस्पतिमनुस्मृत्य – ३९६५ ।[१३]
५. चतुःसहस्रीसूत्राणां पञ्चसूत्रविवर्जिता ।
अष्टाध्यायी पाणिनीयासूत्रे माहेश्वरैः सह ।।[१४]
६. थम्ब–महोदया ३९७६ संख्या इति मन्यते ।[१५]
७. त्रीणि सूत्रसहस्राणि तथा नव शतानि च ।
षण्णवति च सूत्राणां पाणिनिः कृतवान् स्वयम् ।।[१६]

तस्मात् कारणात् सर्वेषु ग्रन्थनेषु अष्टाध्याय्यां चतुःसहस्राणि सूत्राणि सन्ति इति विवेच्यन्ते। पाणिनीयशिक्षायाम् उपर्युक्तसूत्राणामुपदेशवेलायां केचन कौशलाः अवलम्बिताः । तेषु संक्षेपेण किञ्चिदुदाह्रीयते–

**१. संज्ञासूत्ररचनायां कौशलम्–**

विधिसूत्राणामुपकारकत्वेन संज्ञासूत्राणां रचना विधीयते । येषामवबोधनाय पाणिनिना न किञ्चित् निर्दिष्टं उपायविशेषं स्वीकृतम् । भाषाकृतां व्यवहारदृष्ट्या प्रकारचतुष्टयमवधीयते–

(क) यत्र तु अन्यतरः लघुः, यत् लघु सा संज्ञा ।[१७]
(ख) अनाकृतिसंज्ञा आकृतिमन्तः संज्ञिनः ।
(ग) आवर्तिन्यः संज्ञा भवन्ति ।
(घ) पूर्वोच्चारितः संज्ञी, परोच्चारिता संज्ञा ।

परन्तु व्यतिक्रमतया वृद्धिरादैच् सूत्रे मङ्गलार्थक प्रतिपादनार्थं वृद्धिशब्दः

आदौ प्रयुक्तः। यद्यपि अपराणि तथाभूतानि सूत्राणि सन्ति । तथापि वृद्धिरादैच् सूत्रमेव प्रामाणिकत्वेन मङ्गलवाचक-त्वमस्ति ।

**२. परिभाषासूत्रसंघटनकौशलम्–**

परिभाषासूत्ररचनाकाले स्थानबोधनाय षष्ठी प्रभृतिविभक्त्यन्तं पदं प्रयुक्तं दृश्यते । यथा–

(क) कः (१/१/५१)

(ख) तदन्तस्य (१/१/७१)

(ग) अलो अन्त्यस्य (१/१/५२)

(घ) पञ्चम्यन्तस्य दृष्टान्तम्, तस्मादित्युत्तरस्य (१/२/६७)

**३. विधिसूत्ररचनायां कौशलम्–**

साक्षात्साधुत्वसम्पादकत्वमेव विधित्वम् । निम्नोक्तानि यानि स्वीकृतानि । विधिसूत्राणां रचनायाम् इमे उपायाः गृहीताः –

(क) स्थानिकल्पनमादाय तत्रादेशविधानम् ।

(ख) अपूर्वशब्दोपजनम् ।

(ग) उदात्तादिस्वरविधानम् इत्यादि ।

**४. नियमसूत्रेषु उपायाः –**

(क) षष्ठीविभक्तियुक्तः – षष्ठी हेतु प्रयोगे (२/३/२२६, एनपा द्वितीया (२/३/३१)

इत्यादि ।

(ख) सप्तमीविभक्तियुक्तः – षष्ठी चानादरे (२/३/४१)

(ग) साधुनिप्रणाभ्यामर्चायाम् (२/३/४३)

(घ) अतिदेशसूत्रेषु प्रायशः पञ्चभिः उपायैः कार्यसाधिता–

१. स्थानिकल्पनामादायोद्देश्यसाधनम् ।

२. प्रवृत्तिकल्पनपुरःस्कृत्य प्रत्ययविधानम् ।

३. अपूर्वशब्दोपजननम् ।

४. लोपगुणविधिः ।

५. उदात्तादिस्वरविधानम् ।

इत्थमेव पाणिनीयव्याकरणे सूत्रसंख्या सूत्ररचनाकौशलानुलम्बिता।

**५. अतिदेशसूत्रम्—**

वतिघटिततत्वमतिदेशत्वमिति अतिदेशसूत्रस्य सामान्यं लक्षणम् । अति□दिश्□घञ् इति भावार्थे प्रयुज्ये अतिदेशशब्दः निष्पद्यते । पाणिनीयव्याकरणे अति उपसर्गः विंशत्यर्थे प्रयुज्यते। तथैव दिश्धातुः त्रयदशार्थे प्रयुज्यमानाऽस्ति । घञ्प्रत्ययर्थस्तु भावार्थे विधीयेत । अत्र स्थानिकार्य–ममादेशेऽतिदिश्यते । तस्मादुच्यते–

प्रकृतात्कर्मणो यस्मात्तत्सामान्येषु कर्मसु ।
धर्मप्रदेशो येन स्यात् सोऽतिदेश इति स्मृतः ।।

पाणिनीयमतिदेशसूत्राणि –

अष्टाध्याय्यां १०९ संख्याकानि अतिदेशसूत्राणि प्रक्रिया साधनार्थं पाणिनीना प्रणितानि सन्ति । सूत्राणां चरित्रविश्लेषणेन तेषां भेदः त्रिधा विधीयते ।

(१) साक्षाद्वतिघटितः अतिदेशसूत्राणि यानि प्रायशः अष्टाध्याय्याः सर्वेषु अध्यायेषु प्राप्यते । प्रथमोऽध्याये 'आद्यन्तवदेकस्मिन्'[१७] । अन्तिमोऽध्याये त्रिणि सूत्राणि सन्ति । तेषु 'आमन्त्रित पूर्वमविद्यमानवत्'[१८] । एतेषां संख्या ३४ इति ।

(२) अनुवृत्तिमाध्यमेन वतिघटितसूत्राणि अस्मिन् प्रसङ्गे सूत्रेषु वत् इत्यस्य प्रयोगं विनाऽपि पूर्वसूत्रात् अनुवृत्तिं गृहीत्वा अतिदेशकार्यं सङ्घटते । तत् परिगणनेन ज्ञायते एतादृशानां सूत्राणां संख्या ४९ इति ।

(३) प्राकरणिकातिदेशसूत्राणि अष्टाध्यायी पठनेन ज्ञायते प्रकरणादौ अतिदेशसूत्राणां कार्याणि ङित् कित् नित्यभावादि कार्यसाधनाय प्रवर्तन्ते । अध्यायक्रमेण पादक्रमेण च अतिदेशसूत्राणां संख्या–

| अध्यायः | प्रथमपदः | द्वितीयपदः | तृतीयपदः | चतुर्थपदः | | योगः |
|---|---|---|---|---|---|---|
| प्रथमः | ०५ | □३१ | □०२ | □ ०१ | = | ३९ |
| द्वितीयः | ०१ | □०० | □०० | □ १८ | = | १९ |
| तृतीयः | ०३ | □०० | □०६ | □ ०६ | = | १५ |
| चतुर्थः | ०० | □०२ | □०२ | □ ०० | = | ०४ |
| पञ्चमः | ०१ | □०० | □०० | □ ०० | = | ०१ |
| षष्ठः | ०३ | □०२ | □०७ | □ ०२ | = | १३ |
| सप्तमः | ०७ | □०० | □०० | □ ०१ | = | ०८ |
| अष्टमः | ११ | □०० | □०० | □ ०० | = | ११ |

पूर्णयोगः १०९

**६. अधिकारसूत्रम्—**

षड्विधेषु सूत्रेषु अधिकारसूत्रमन्यतममस्ति । निम्नोक्तदिशा अधिकारसूत्रस्य लक्षणं साकल्यते ।

(१) स्वदेशे वाक्यार्थशून्यत्वे सति परदेशे वावयार्थबोधकत्वमधिकारत्वम्। यथा– 'धातोः'[१९] ।

(२) उत्तरप्रकरणव्यापी अधिकारः । यथा– 'पूर्वत्रासिद्धम्'[२०] ।

अधिकारसूत्रं महाभाष्ये त्रिधा विभज्यते ।

(क) एकस्मिन् स्थाने पठितेऽपि सर्वं शास्त्रं व्यावृत्तं करोति । यथा– प्रदीपः गृहस्य एकस्मिन् स्थाने स्थिते सति समस्तगृहं प्रकाशयति, तस्मादुच्यते– अधिकारः प्रतियोगं तस्यानिर्देशार्थं इति योगे योगे उपतिष्ठते[२१] ।

(ख)द्वितीयोऽधिकारः अनुवृत्तिसदृशः वर्तते । यः चकारद्वारा अनुकृष्यते । तस्मादुच्यते महाभाष्ये– 'रज्वायसा वा बद्धं काण्ठमनुकृष्यते वद्वदनुकृष्यते चकारेण[२२] ।

(ग) स्वरितद्वाराऽपि अधिकारः प्रदर्श्यते । तदर्थं पाणिनीना 'स्वरितेनाऽधिकारः'[२३] इति सूत्रं प्रणीतम् ।

अधिकारसूत्रं कदाचित् एकपदविशिष्टं भवेत् । यथा– 'अनभिहिते'[२४] । कदाचित् द्वयधिक-पदानां समावेशेनापि अधिकारसूत्रं प्रसज्यते । तथाहि– 'अलुगुत्तरपदे'[२५] ।

इत्थमेव सूत्राणां व्याख्यार्थं बहुसमयः सोपेक्ष्यते ।

---

**सन्दर्भाः**

१. शब्दकल्पद्रुमः ।
२. मुग्धबोधटीकायां दुर्गादासः ।
३. पाणिनीयशिक्षा – ५६
४. नन्दिकेश्वरकृत– काशिका ।
५. पाणिनीयाष्टाध्यायी (१/१/६४)
६. सा.एव. (१/१/५०)
७. सा.एव. (६/१/७७)
८. सा.एव. (२/३/५०)
९. सा.एव. (१/१/५०)

१०. सा.एव. (१/४/२३)
११. Library Remain Vol-I, pp. 127
१२. Hund Beek Des Sanskrit pp-29
१३. अष्टाध्यायी – चन्द्रलेखा हिन्दी व्याख्या, सं.– पा. ईश्वरचन्द्रः विषयप्रवेशे
१४. स्वरसिद्धान्तचन्द्रिका पृष्ठा–३, श्लोक– १५
१५. Annamalai University Edition - 3981+14 = 3995
१६. SC Chakravarty, Introduction to his Edition of the Nayak - 3996
१७. पाणिनीयाष्टाध्याया १/१/२०
१८. सा.एव. ८/१/७२
१९. सा.एव. ३/१/९१
२०. सा.एव. ८/२/१
२१. महाभाष्ये २/१/१
२२. महाभाष्ये १/१/४९
२३. पा.अ. १/३/११
२४. पा.अ. २/३/१
२५. पा.अ. ६/३/१


—०—


*सहायकाचार्यः विभागाध्यक्षश्च,*
*संस्कृतविभागः*
*रेभेन्साविश्वविद्यालयः, कटकम्*

# ध्वनि: काव्यस्यात्मा कथं विप्रतिपत्ति: ?

डॉ. जितेन्द्र कुमारदाश:

ध्वन् शब्दे इति धातुना सह कर्त्तरि, कर्मणि, करणे अधिकरणे वा इ" प्रत्यययोगेन ध्वनि" शब्द: निष्पद्यते। अयं शब्द: संस्कृतवाङ्मये विविधेष्वर्थेषु प्राचीनकालादेव व्यवहृतोऽस्ति। (१) तत्र ध्वनति य: स: व्यञ्जक: शब्द: ध्वनि:। वाचक: लक्षक: व्यञ्जकश्च यदा व्यङ्ग्यार्थस्य व्यञ्जका: भवन्ति तदा ते ध्वनिरित्युच्यन्ते। (२) ध्वन्यते इति ध्वनि:। ध्वनिता: वस्त्वलंकाररसा: ध्वनिरित्युच्यन्ते। (३) ध्वनति ध्वनयति वा य: स: व्यञ्जकोऽर्थ: ध्वनि:। (४) ध्वन्यते अनेन इति ध्वनि: अर्थात् अभिधा, लक्षणा, व्यञ्जना इति शब्दशक्तय:। यथा शब्दशक्त्या व्यङ्ग्यार्थ: प्रतीयते स: ध्वनि:। (५) ध्वन्यते अस्मिन्निति ध्वनि:। यस्मिन् काव्ये वस्त्वलंकाररसा: ध्वनिता भवन्ति स एव ध्वनि:। इत्थं ध्वनिशब्द: व्यञ्जकशब्द-व्यञ्जकार्थव्यङ्ग्यार्थ- व्यञ्जनाशक्ति-काव्यरूपेऽर्थे प्रभूज्यते[१]। न केवलं काव्यशास्त्रे ध्वनि शब्द: मिलति अपितु अथर्ववेदे लोकप्रचलितेऽर्थे ध्वनि शब्द: प्रयुक्तोऽस्ति[२]। महाभाष्यकारेण प्रतीत: शब्द: ध्वनि: निगदित: । अपि च स्फोटाभिव्यक्ते: परमुत्पन्न: वैकृतशब्द: ध्वनिरिति तेनोक्तम्। वाक्योपदीयेऽपि ध्वनिशब्द: मिलति[४]। मम्मटेनोक्तं यत्- अर्थप्रत्यायने य: स्फोटं व्यनक्ति स ध्वनि:[५]। साहित्यशास्त्रे ध्वनिसिद्धान्तस्य प्रौढरुपं प्रस्तुतं श्रीमतानन्दवर्धनेन। ध्वन्यालोकस्यारम्भे ध्वनिविरोधिमतानि विखण्डयता तेन ध्वनिसिद्धान्तस्य स्थापना कृता। तत्र तेनोक्तं यत् काव्यात्मभूतं यत् तत्त्वं विपश्चित: ध्वनिं निगदन्ति तस्माभावं केचित् वदन्ति, अपरे केचित् तत् भाक्तं नाम लक्षणागम्यं इति वचन्ति। कैश्चिद् विद्वदभि: तस्यानिर्वचनीयत्वमुक्तम्। अत: विदूषां विप्रतिप्रत्ति: निराकर्तुं आनन्दवर्धनेन ध्वनि: साङ्गोपाङ्गमालोचित:। तत्र ध्वन्यालोके-

काव्यस्यात्मा ध्वनिरिति वुधैर्य: समाम्नातपूर्व
तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।।
केचिद्वाचां स्थितमविषये तत्त्वमुचुस्तदीयं
तेन ब्रूम: सहृदयमन: प्रीतये तत्स्वरूपम्।।[६]

आनन्दवर्धनस्य भणितिरियं सूचयति यत्-ध्वन्यालोकस्य रचनात् पूर्वं भरतस्य नाट्यशास्त्रे भामहस्य काव्यालंकारे, उभटस्य काव्यालंकारसारसंग्रहे , दण्डिन: काव्यादर्शे, वामनस्य काव्यालंकारसत्रवृत्तौ तथा रूद्रटस्य काव्यालङ्कारे यद्यपि ध्वने: विवेचनं नास्ति किन्तु आनन्दवर्धनेनोक्तग्रन्थानामाधारेण विरोधिमतानां परिकल्पना कृता। ध्वनिसिद्धान्तस्य मूलस्रोत: वैयाकरणानानां स्फोटसिद्धान्त: इति भारतीयदर्शनेषु विवेचितायां व्यञ्जनायां लक्ष्यते। अतएव आनन्दवर्धनात् पूर्वं ध्वनितत्त्वमासीत्। किन्तु तस्य प्रामाणिकस्वरुपं प्रथमं ध्वन्यालोके एव प्रस्तुतम्। ध्वनिसिद्धान्तस्य स्थापनात् पूर्वं परोक्षतया

ध्वनितत्त्वमालोचितमायार्यै:। तत्र भरतेन रसादितात्पर्येण ध्वन्यमानार्थस्य प्रतिपादनं कृतम्। अस्फुटरूपेण प्रतीतं ध्वनितत्त्वरुपं काव्यतत्त्वं व्याख्यातुमशक्नुवदभि: वामनादिभि: आचार्यै: रीतिप्रचलनं कृतम्। तत्र ध्वन्यालोके-

(क)"एतच्च रसादितात्पर्येण काव्यनिवन्धनं भरतादावपि सुप्रसिद्धमेवह्ल।

(ख) अस्फुट-स्फुरितं काव्यतत्त्वमेतद् यथोदितम।

अशक्नुवदभिव्यार्कुं रीतय: सम्प्रवर्तिता:।।[८]

काव्ये अलंकारं अङ्गिनं मन्यमानै: भामहादिभि: अलंकारेषु ध्वने: अन्तर्भाव: कृत:। अस्मिन् विषये रूय्यक[९]विद्याधरयो:[१०] मतद्वयं सुस्पष्टमेव। परन्तु ध्वने: अस्तित्वं स्वतन्त्रमितिकृत्वा अलंकारेषु तस्यान्तर्भाव: सर्वथासम्भव एव। वाल्मीकि-व्यास-कालिदासादिभि: महाकविभि: स्व स्व रचनासु ध्वन्यर्थस्य निवन्धनं कृतमिति आनन्दवर्धनेन अभिनवगुप्तेन च लोचनटीकायामुक्ताम्।[११]

"तस्य हि ध्वने: स्वरुपं सकलसत्कविकाव्योपनिषद्भूतमतिरमणीयम्.........।[१२]

"रामायणमहाभारतप्रभृतिशब्देन आदिकविप्रभृतिभि: सर्वैरेव मुनिभिरस्यादर: कृत इति दर्शयति।[१३] तत्र वाल्मीके: हेमन्तवर्णना प्रसङ्गे -

रवि: संक्रान्त सौगाभ्यस्तुषरावृतमण्डल।

नि:श्वासान्ध इवादर्शश्चन्दमा न प्रकाशते।१४

हेमन्ते यस्य चन्द्रस्य सूर्यसंक्रान्तसौभाग्यं तुषारेणावृतम् स चन्द्र: नि:श्वासान्ध आदर्शे इव न प्रकाशितो भवति। अत्र वाचक: "अन्धह्ल शब्द: आदर्श चन्द्रे च वाधित: सन् लक्षणलक्षणया अप्रकाशरुपमर्थं लक्षयति। अप्रकाशिताशयरुपोऽर्थ: अत्र ध्वन्यते।

किंच महर्षिव्यासस्य पद्यम्-

अतिक्रान्तसुखा: काला: प्रत्युपस्थितदारुणा:।

श्व: श्व: पापीयदिवसा पृथिवी गतयौवना।[१५]

सुखविरहिता: दु:खपरिपूर्णा: काला: जाता:। एवं गतयौवनाया: पृथिव्या: दिवसा: प्रतिकूला: जाता: ।

अत्र कालस्य तावन्निर्वेदमभिव्यञ्जयत: शान्तरसव्यञ्जकत्वम्।

कालिदासस्य विकमोर्वशीये-

अयमेकपदेतयावियोग: प्रियवाचोपन: सुदु:सहो मे

नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यै:।।[१६]

एकपदे प्रियाया: वियोग: पुन: नववारिधरै: निरातपरम्याणि पुरुरवस: दिनानि जातानि।

अत्र च शब्देन प्रतीयते यत् - प्रियाविच्छेद सहित: वर्षागम: प्राणहरणायालम्। अत्र च च" रूपनिपातेन विप्रलम्भ: शृङ्गार: व्यज्यते।

यथा च भगवद्गीतायाम्-

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जागर्ति भूतानि सा निशा पश्यतो मुनेः।।[१७]

या अन्येषां कृते रात्रि र्भवति तस्मिन् काले तत्त्वज्ञः जार्गर्ति, यदा च प्राणिनः जाग्रति तदा तत्त्वज्ञानी सर्वं पश्यति। अत्र निशा, जाग्रर्ति, जाग्रतीतिपदेषु मुख्यार्थः न विवक्षितः। किन्तु संयमिनः तत्त्वज्ञाननिष्ठता अतत्त्वपराङ्मुखता च प्रकाशिते भवतः। अतः अत्र अविवक्षितवाच्ये अत्यन्ततिरस्कृतवाच्यध्वनिः। पण्डितराजजगन्नाथपादाः कथयन्ति यतभामह उद्भटप्रभृतिभिः यद्यपि ध्वनिगुणिभूतव्यङ्ग्यादिशब्दानां प्रयोगः न कृतः तथापि तैः परोक्षतया ध्वनेः सत्ता अङ्गीकृता। यतः तैः समासोक्त्याद्यलंकारेषु गुणीभूततव्यङ्ग्यस्य तथा पर्यायोक्ते समग्रध्वनिप्रपञ्चस्यान्तर्भावः कृतः। तत्र रसगंगाधरे-

"इदं तु वोध्यम्-ध्वनिकारात् प्राचीनैर्भामहोद्भटप्रभृतिभिः स्वग्रन्थेषु कुत्रापि ध्वनिगुणीभूतव्यङ्ग्यादिशब्दाः न प्रयुक्ता इत्येवतैव तैर्ध्वन्यादयो न स्वीक्रियते इत्याधुनिकानां वाचोयुक्तिरयुक्तैव। यतः समासोक्ति व्याजस्तुत्यप्रस्तुतप्रशंसालंकारनिरूपणेन कियन्तोऽपि गुणीभूतव्यङ्ग्यभेदास्तैरपि निरुपिताः। अपरश्च सर्वोऽपि व्यङ्ग्यप्रपञ्चः पर्यायोक्तकुक्षौ निक्षिप्तः।[१८]

किंच अनुभवसिद्धस्यार्थस्यापलापः वालकै रपि कर्तुं न शक्यते। अपि च प्रधानत्वादलंकार्यस्य ध्वनेः पर्यायोक्ते अन्तर्भावः कथं सम्भवेत्? पुनः जगन्नाथेन-

"न हि अनुभवसिद्धोऽर्थो वालेनाऽप्यहनोतुं शक्यते। ध्वन्यादिशब्दैः परं व्यवहारो न कृतः। न हि एतावतानङ्गीकारो भवति। अतः प्राधान्याद् अलंकार्यो हि ध्वनिरलंकारस्य पर्यायोक्तस्य कुक्षौ कथकारं निविशताम्।[१९]

अत एव ध्वनितत्त्वं ध्वन्यालोकादपि प्राचीनम्। आनन्दवर्धनात् पूर्वं सदपि ध्वनितत्त्वं तस्य व्याख्यानं कुर्वता आनन्दवर्धनेन ध्वनिसम्प्रदायः प्रतिष्ठापितः। ध्वनितत्त्वस्य महत्त्वमुद्घोषयता तेनोक्तं यत्- यः ध्वनिः रसाश्रयेण समुचितः तथा गुणालंकारपरिशोभितः तस्मात् कल्पवृक्षोपमात् ध्वनेः कविजनाः मनोवांच्छितपदार्थान् प्राप्नुवन्ति। अतः ध्वनेः महत्वं पर्याप्तं भवति। तत्र ध्वन्यालोके -

नित्याक्लिष्टं रसाश्रयोचितगुणालंकारशोभादृतो-
यस्मादवस्तु समीहितं सुकृतिभिः सर्वं समासाद्यते।
काव्याख्येऽखिलं सौख्य धाम्नि विवुधोद्याने ध्वनिर्दर्शितः
सोऽयं कल्पतरुपमानमहिमा भोग्योऽस्तु भव्यात्मनाम्।।[२०]

किं चोत्तमकाव्यं प्रशंसता तेनोक्तं यत्-

सत्काव्यतत्त्वविषयं स्फुरितप्रस्तुप्त-
कल्पं मनः सुपरिपक्वधियां यदासीत्।
तद व्याकरोत् सहृदयोदयलाभहेतो-
रानन्दंवर्धन इति प्रथिताभिधानः।।[२१]

किं च प्रतीयमानं (ध्वन्यर्थ:) अन्यदेव किंचिद
वस्त्वस्ति यदेव रमणीनामवयवभिन्नं लावण्यमिव केवलं महाकवीनां सूक्तिषु एव स्फुरति। ध्वन्यालोके-"प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्
यत् तत् प्रसिद्धावयनारिक्तं विभाति लावण्यमिवाङ्गनासु।।[२२]

इत्थं ध्वनितत्त्वस्य सदपि बहुलं गुरुत्वं काव्यशास्त्रिभि: कैश्चित् ध्वनिविरोधिमतानि प्रदत्तानि । तर्हि ध्वने: आत्मत्वं प्रमाणीकर्तुं ध्वनिविरोधिमतानां खण्डनमपरिहार्यम् । तत्र केषांचित् मीमांसकानां मतानुसारं तात्पर्या शक्तिरेव व्यङ्ग्यार्थं वोधयितुं क्षमा।[२३] केचिदपि अभिधाशक्त्या ध्वन्यर्थस्योववोध: इति कथयन्ति।[२४] अपरेषां मतानुसारं लक्षणैव ध्वन्यर्थवोधनक्षमा भवति। तत्र यथा उपदानलक्षणया "रामोऽसौ भूवनेषु "रामोऽस्मि सर्वं सहे, "रामेण प्रियजीवितेनह्व इत्यादि स्थलेषु 9राम पदस्य"खरदूषणनिहन्ता, सकलदु:खसहनसमर्थ:, निष्करुण: इत्यादयोऽर्था: लक्ष्यन्ते। अत: कथं तत्र ध्वने: आवश्यकता?

पुन: केचित् कथयन्ति यत् - "उपकृतं वहु तत्र किमुच्यतेह्व इति पद्ये अपकृतादयोऽर्था: लक्षणाया: विषया: न ध्वने: । तत्र मुकुलभट्टस्य मतानुसारं शब्दव्यापारेण प्रतीतस्यार्थस्य मुख्यत्वमेव। अर्थ सामर्थ्येनाक्षिप्त: लक्ष्यामाण उच्यते। तत्र मुकुलभट्टेन -

"शब्दव्यापारतो यस्य प्रतीतिस्तस्य मुख्यता।
अर्थावसेयस्य पुन: लक्षमाणत्वमुच्यते।।[२५]

शंकुक- महिमभट्ट-जयन्तभट्टै: स्वार्थानुमानेन परार्थानुमानेन च ध्वने: अनुपेयत्वमाम्नातम्। तेषां मतानुसारं वाक्यार्थेन असम्बद्धार्थ: न कदापि प्रत्येति। यदि प्रतीयते तर्हि सर्वे एवं शब्दा: सकलार्थानां वोधका: भवेयु:। अत: व्यङ्ग्य-व्यञ्जकभावस्य व्याप्ति रूपत्वमेव। तत्र महिमभट्टेन -

(१)"अनुमानेऽन्तर्भावं सर्वस्यैव ध्वने: प्रकाशयितुम्।
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्ह्व।।[२६]

(२) "वाच्यस्तदनुमितो वा यत्रार्थोऽर्थान्तरं प्रकाशयति।
सम्वन्धत: कुतश्चित सा काव्यानुमितिरित्युक्ताह्व।।[२७]

न्यायसूत्रस्य व्याख्याकारेण जयन्तभट्टेन "भ्रम धार्मिक! विश्रव्ध.....ह्व इत्येत्र विधे: निषेध रुपोऽर्थ:, निषेधात् विधिरुपोऽर्थश्च न ध्वने: विषयौ। अत: तत्र नास्ति व्यञ्जनाया: आवश्यकता। तत्र न्यायमञ्जर्याम्-

"एतेन शब्दसामर्थ्यमहिम्ना सोऽपि वारित:।
यमन्व: पण्डितंमन्य: प्रपेदे कंचन ध्वनिम्।
विधेर्निषेधावगतिर्विधिवुद्धिर्निषेधत:।।
मानान्तरपरिच्छेद्य वस्तुरुपोपदेशिनाम्।
शब्दानामेव सामर्थ्यं तत्र तत्र तथा तथा।।[२८]

अपरै: कैश्चिद मीमांसकै: अर्थापपत्या ध्वनिं वोधयितुं यतमाना: लक्ष्यन्ते। यया अर्थस्य (उपपादकस्य) कल्पनं क्रियते सा अर्थापत्ति:। यथा - "पोनश्चैत्रो दिवा न भुङ्क्ते" इत्यत्र दिवा अभुक्तस्य चैत्रस्य पीनत्वं भोजनं विनानुपपन्नम। अत: तत्र रात्रिभोजनस्य कल्पना क्रियते। अर्थापत्ते: दृष्टार्थापत्ति: श्रुतार्थापत्तिश्चेति प्रकारद्वयम्। दृष्टार्थापत्तौ दृष्टोपपाद्येन उपपादकस्य कल्पना क्रियते। यथा पूर्वोक्ते उदाहरणे दृष्टपीनत्वरुपोपपाद्येन रात्रिभोजन रूपोपादकस्य कल्पनं क्रियते। अपि च - "जीवन चैत्रौ गृहे नास्ति" इत्यत्र श्रुतजीवितत्त्वरुपोपपाद्येन वहि: सत्त्वरुपोपपादकस्य कल्पनं क्रियते। तथा "नि:शेषच्युतचन्दनं......" इत्यत्र नायकान्तिगमनरुपविध्यादि: अर्थापत्त्यावोध्य: न व्यञ्जनया।

तथा तन्त्रेणैव ध्वन्यमानार्थस्य वोधनं स्वीकुर्वतामाचार्याणां मतं यत्- "श्वेतो धावति इत्यत्र श्वेत: नाम धवल: धावति तथा श्वा (सारमेय) इत: धावति इत्यर्थद्वयं तन्त्रेणैवावगम्यते। तत्रानेकार्थवोधनेच्छया एकपदस्य सकृदुश्चारणं तन्त्रम्।

किंच भामह-दण्डि-रुद्रट-उद्भटपभृतिमि: प्रतीयमानार्थस्य विविधालंकारेषु अन्तर्भाव: कृत:।[२९] रसं कार्यं मन्यमानानां ध्वनिविरोधिनां भट्टलोल्लटादीनां मतेन रस: उत्पद्यते न ध्वन्यते प्राक्सिद्धात्वाभावात्। रसादीनां विभावादिभि: उत्पत्ति: नाभिव्यक्ति:। भट्टनायकेन रसोत्पत्ते: रसानुमिते: रसाभिव्यक्तेश्च खण्डनं कृतम्। तन्मतानुसारं भावकत्वव्यापरेण साधारणीकृतेषु

विभावादिषु भोजकत्वव्यापारेण रत्यादीनां भोग: भवति।[३०] कुन्तकेन वक्रोक्तिव्यापारेण ध्वने: अववोध: निगदित:।[३१]

उपर्युक्तध्वनिविरोधिमतेषु पूर्वमीमांसकै: उद्भाविता‌ं, धनञ्जय[३२] धनिकाभ्यां[३३] च प्रतिपादितां तात्पर्यशक्तिं खण्डयन् आनन्दवर्धन: निगदति यत्-

पदार्थानाम् अन्वयमात्रस्य वोधनात् परं परिक्षीणायां तात्पर्यायां कथं सा ध्वन्यर्थवोधने समर्था भवेत्? किं चाभिधया प्रतीयमानार्थस्याववोध: तस्मिन् अर्थे संकेतग्रहाभावात्।[३४] शब्दवुद्धिकर्मणां विरम्यव्यापाराभाव: इति सिद्धान्तेन "इषुरिव दीर्घदीर्घतरोऽभिधाव्यापार:" इति इयं प्राचीनमीमांसकानामुक्ति: न संगच्छते।

भक्तिवदिन मतं विखण्डयता आनन्दवर्धनेनोक्तं यत् □ भक्तिवादे विकल्पवादे विकल्पत्रयं जायते। तत्र प्रथमविकल्पे ध्वने: भक्तित्वं स्वीकृत्य घटकलशयो: अभेदत्वप्रतिपादितमस्ति। द्वितीयविकल्पे भक्ति: ध्वनिरुपलक्षणमिति कथितमस्ति। भक्तिध्वनयोरभेदत्वं खण्डयता आनन्दवर्धनेनोक्तं यत् ध्वनि: सर्वथा भक्ते: भिन्न:। अत: भक्त्याा तस्यैकत्वमसम्भवम्। वाच्यभिन्नार्थ: य: व्यङ्ग्यव्यञ्जकसम्बन्धेन प्रत्येति तस्य प्राधान्ये ध्वनि:। परन्तु भक्ति तु उपचारमात्रम्[३५]। अपि च भक्ति: ध्वनेर्लक्षणमिति यदि उच्यते तर्हि तत्र अतिव्याप्ति: अव्याप्ति श्चेति दोषद्वयमापतेत्।[३६] भक्ति: ध्वनेर्लक्षणमिति

स्वीकारे -यत्र ध्वनिर्नास्ति तत्र निरुढलक्षणायां अपि भक्तेः सद्भावादतिव्याप्तिदोषः। अपि च अविवक्षितवाच्यध्वनौ मुख्यार्थवाधं विना अर्थान्तरस्य प्रतीतेः नास्ति भक्तेः अवसरः।

किंच भक्तिः ध्वनेः उपलक्षणमपि न भवति। यदि ध्वनेः प्रभेदेषु अन्यतमभेदस्य भक्तिः उपलक्षणरूपेण सम्भवति तथा गुणवृत्या ध्वनिर्लक्ष्यते तर्हि अभिधाव्यापारेण सर्वे अलंकाराः लक्षिता भविष्यन्ति। प्रत्येकमलंकाराणां लक्षणकरणे वैयर्थ्यप्रसङ्गः स्यात्। अतएव लक्षणायां ध्वनेः नार्न्तभावः।

अपि च शंकुकमहिमभट्टादिभिः लिंग-लिंगि-भावसम्बन्धेन रसादीनां यदनुमेयत्वमुक्तम् तदप्यसमञ्जसम्[३७]। यतः "दुष्यन्तः शकुन्तलाविषयकरतिमान् विलक्षणकटाक्षादिमत्वात् यो नैवं स नैवं यथाहम्ह्ल इत्यत्रानुमानेन प्रतीतस्य रसस्य वस्तुतः न रसत्वम्। यतः रस एव सहृदयहृदये उत्पन्नः अलौकिकानन्द स्वाद एव। तथा "भ्रम धार्मिक विश्वस्तःह्ल इत्यत्र वस्तुध्वनौ

हेत्वाभासकारणात् "भ्रमणनिषेधह्ल रुपव्यङ्ग्यार्थस्य नानुमेयत्वम्, अपि तु तत्र अलंकारध्वनिः। तथा "निःशेषच्युतचन्दनह्ल मित्यत्र चन्दनादीनां विशेषणानां तदन्तिकगमनानुमापकत्वमयुक्तम्। तेषां स्नानादिना अपि तत्सम्भवादनैकान्तिकत्वात्।

किंच तन्त्रैणैव विधिरुपवाच्यात् निषेधरुपव्यङ्ग्यस्य तथा निषेधरूपवाच्यात् विधिरुपव्यङ्ग्यार्थस्य प्रतीतिः कथं सम्भवेत्?

तथा च समासोक्त्याद्यलंकारेषु प्रतीयमानार्थस्य अन्तर्भावः कथमपि न सम्भवेत्। यतः व्यङ्ग्यव्यञ्जकभावसम्वन्धमूलकस्य ध्वनेः वाच्यवाचकचारुत्वहेतुषु अलंकारेषु अन्तर्भावः कथं ग्रहणीयः।[३८] अपि च ध्वनौ व्यङ्ग्यार्थस्य प्राधान्यात् शब्दार्थौ उपसंर्जनीभूतौ। अत एव यत्र वाच्यानुगामिनः व्यङ्ग्यार्थस्य प्राधान्यात् शब्दार्थौ उपसंर्जनीभूतौ[३९], अतएव यत्र वाच्यानुगामिनः व्यङ्ग्यस्याप्राधान्यम् तत्र भवन्तु नाम समासोक्त्यादयः अलंकाराः। परन्तु व्यङ्ग्यस्य प्राधान्ये ध्वनिः एव।

आनन्दवर्धनेन विवक्षितान्यपरवाच्यध्वनेः असंलक्षक्रमव्यङ्ग्ये रसाभावादीनां विचारः कृतः। तन्मतानुसारं ध्वनिः काव्यस्यात्मा न रसः। विभावादिभिः रसः ध्वन्यते। विभावादीनां शब्दतः प्रतिपादनत्वात तेषां वाच्यत्वम्। रसादीनां शब्देन प्रतिपादने न केवलं तेषां प्रतीत्यभावः प्रत्युत दोष एव। अपि च रसाभावेऽपि वस्त्वलंकारयोः ध्वनित्वं सम्भवति। परन्तु रसप्रतीतिः ध्वनिं विना न सम्भवति। पुनः अलंकारध्वनौ अलंकार्यरुपेण सः रसादीनां समकक्षतां भजमानः काव्ये प्राधान्यं भजते। अलङ्काराणां वाच्यत्वे रसादिध्वनेः उत्कर्षकत्वं चारुत्वहेतुत्वं च। यथा कटककुण्डलादयः अलंकाराः शरीरस्य सौन्दर्यविधायकाः आत्मनश्चोत्कर्षकाः भवन्ति तथा यमकादयः शब्दालंकाराः उपमादयः अर्थालंकाराश्च शब्दार्थरुपे काव्यशरीरे सौन्दर्यं प्रकटयन्तः रसदिध्वनिरुपस्य काव्यात्मनः उत्कर्षका भवन्ति।[४०]

अत: आनन्दवर्धन-मम्मट प्रभृतिभि: रसाभावादीनामुत्कर्षकेषु अलंकारेषु अलंकारत्वं शोभाविधायकत्वं च स्वीकृतम्। रसपरिपन्थिनां श्लेष-यमक-प्रहेलिकादीनां हेयत्वमाम्नातम्। अलंकाराणां काव्येषु प्रधानतया विधानमनुचितम्, परन्तु रसादीनामङ्गरुपेणालंकाराणां विवक्षा उचिता।

किं च वामनस्य गुणविशिष्टपदरचनारूपा रीति: आनन्दवर्धनस्य च असमासा □मध्यम समासा-दीर्घसमासारूपा संघटना शब्दार्थरूपेण काव्यशरीरेण सम्बन्धिता। या रीति: वामनेन काव्यात्मरूपेण निरूपिता सा रीति: संघटना वा रसादिध्वनिमुपकरोति। वक्रोक्ति: वाच्यार्थं वोधयन्ती पुन: कथं व्यङ्ग्यमर्थं वोधयेत्? औचित्यस्य काव्ये सदपि महत्वं न तत् आत्मस्थानीयं भवति। परन्तु तत् रसध्वने: सहायकत्वेन प्रतिष्ठितम्। औचित्यस्य निजस्वं किमपि महत्वं न वर्त्तते। रसद्वारैव तत् चारुतरं भवति। रसध्वनि: काव्यास्यात्मा भवति। रीत्यलंकारादय: तस्योपकारका एव।

**सहायकाग्रन्था:**

१. ध्वन्यालोक: (लोचन:) □पृ.५९।

२. लोके प्रतीतपदार्थक: ध्वनिशब्द: - महाभाष्यम् -१/१/७०।

३. अन्तरेमे नभसी घोषो अस्तु पृथक्ते ध्वनयोयन्तु शोभम्- अथर्ववेद: ५/ २०/७।

४. य: संयोगवियोगाभ्यां करणैरुपजन्यते।
स: स्फोट: शब्दज: शब्दो ध्वनिरित्युच्यते वुधै:। वाक्योपदीयम्-१
स्फोटस्य ग्रहणे हेतु: प्राकृतोध्वनिरिष्यते।
स्थितिभेदे निमित्तत्वं वैकृत: प्रतोपद्यते।
शब्दस्योर्द्धवमभिव्यक्ते वृत्तिभेदेत वैकृता:।
ध्वनय: समुपहन्ते फोटात्मा तैर्न भिद्यते। वाक्योपदीयम्। १/७५,७८

५. ध्वनति स्फोटं व्यनक्तीति। ध्वनति व्यङ्ग्यार्थं प्रकाशयतिती ध्वनि:।
वुधैर्वैयाकरणै: प्रधानभूत स्फोटरूपव्यङ्ग्यव्यञ्जकशब्दस्य ध्वनिरिति व्यवहार: कृत: । काव्यप्रकाश: प्रथम उल्लास:।

६. ध्वन्यालोक: - १/१।

७. ध्वन्यालोक: - ३/३२ वृत्ति:

८. ध्वन्यालोक: - ३/४७।

९. इहहि तावत् भाामहोद्भटप्रभृतयश्चिरन्तनालङ्कारकारा: प्रतीयमानमर्थं वाच्योपस्कारकतयालंकारपक्षनिक्षिप्तं मन्यते। अलंकारसर्वस्व:-पृ.३।

१०. यत् पुनरत्नरकोटिनिविष्टत्वं वस्तुध्वनेरुद्भावयन् भामहादयस्तदपि विचारविधुरम्। एकावली-पृ.३०।

११. अथ च रामायणमहाभारत प्रभृतिलक्ष्ये सर्वत्र प्रसिद्ध व्यवहारं लक्षयतां सहृदयानामानन्दो मनसि लभताम् प्रतिष्ठाम्। ध्वन्यालोक: -पृ.१३।
१२. ध्वन्यालोक: -पृ.१३।
१३. ध्वन्यालोक: (लोचम) पृ.१३।
१४. वालरामायणम् ( आरण्यकाण्डम्) -१६/१३।
१५. महाभारतम् (आदिपर्व)-१२८/६।
१६. विक्रमोर्वशीयम् -४/१०।
१७. भगवद्गगीता-२/६९।
१८. रसगङ्गाधर: -पृ.६५८-६५९।
१९. रसगङ्गाधर: -पृ.६५९।
२०. ध्वन्यालोक: -४/१७।
२१. ध्वन्यालोक:-४/१८।
२२. ध्वन्यालोक:१/४।
२३. दशरूपकम् -४/३७ (अवलोक टीका)।
२४. काव्यप्रकाश: - पञ्चम उल्लास:।
२५. अविधावृत्तिमातृका-पृ.२।
२६. व्यक्तिविवेक:-१/१।
२७. व्यक्तिविवेक:-१/२५।
२८. न्यायमञ्जरी-पृ.४८।
२९. अलंकारसर्वस्व: -पृ.३-६।
३०. ध्वन्यालोक: (लोचन:) पृ-८२-८३।
३१. ध्वन्यालोक: (लोचन:) पृ.८२-८३।
३२. वाच्या प्रकारणादिभ्यो वुद्धिस्था वा यथा क्रिया।
वाक्यार्थ: कारकैर्युक्ता स्थायी भावस्तथेतरै।। दशरुपकम्-४/३७।
३३. न चापदार्थस्य वाक्यार्थत्वं नासतीति वाच्यम्।
कार्यपर्यवसायित्वात् तात्पर्यशक्ते:।। दशरूपकम्-(अवलोक:) -४/३७।
३४. व्यापरश्च नाभिधात्मा समयाभावात्। ध्वन्यालोक: (लोचन:) पृ.२१।
३५. (क) भक्त्या विभर्ति नैकत्वं रुपभेदादयं ध्वनि:। ध्वन्यालोक: १/१७।
(ख) वाच्यव्यतिरिक्तस्यार्थस्य वाच्यवाचकाभ्यां तात्पर्येणार्थप्रकाशनं यत्र व्यङ्ग्यप्राधान्ये ध्वनि: उपचारमात्रं तु भक्ति:। ध्वन्यालोक:-१/१६ (वृत्ति:)
३६. अतिव्याप्तेरव्याप्तेर्नचासौ लक्ष्यते तया। ध्वन्यालोक: १/१७।
३७. न पुनरयं परमार्थो यद व्यञ्जकत्वं लिङ्गत्वमेव सर्वत्र व्यङ्ग्यप्रतीतिश्च लिङ्गिप्रतीतिरेवेति। ध्वन्यालोक: ३/३३ वृत्ति:।
३८. व्यङ्ग्यव्यञ्जक सम्बन्धनिवन्धनतया ध्वने:।
वाच्यवाचकचारूत्वहेत्वन्त:पातिता कुत:। ध्वन्यालोक:
३९. यथार्थ: शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्त काव्यविशेष: स ध्विनिरिति सुरभि: कथित: । ध्वन्यालोक: १/१५।
४०. व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिन:
समासोक्त्यादयस्तत्र वाच्यालंकृतय: स्फुटा:।। ध्वन्यालोक: १/१४।

**प्राध्यापक:, संस्कृतविभाग:**
**अभिमन्युसामन्त सिंहार उच्चमाध्यमिकविद्यालय:**
**वालिआ, याजपुरम्, ओडिशा।**

# संज्ञासूत्रेषु विभक्तिनिर्द्देश:

डॉ. गिरिधारीपण्डा

सार्वजनीनप्रयोगसाधनोदेश्येन उदिष्टम् उपदिष्टं च व्याकरणशास्त्रम् अद्यत्वे प्रथितेन महिम्ना पाणिनीयम् त्रिमुनिभावनां रञ्जितं त्रिमुनि-व्याकरणम् इति प्रसिद्धा कालेन प्रवर्त्तितम्। सूत्रात्मकं तत् व्याकरणम्“[१] सूत्र वार्त्तिकभाष्यानुबद्धमार्गेण विषयीकृतम्। सूत्रकारभावेन पाणिनिना सूत्रोपदार्थितेन मार्गेण व्याकरणम् उपनिबद्धम्। अष्टाध्याय्या: अनुशीलनात् प्रत्येतव्यं जायते यत् २२७ संख्यका: पारिभाषिकशब्दा: प्रथिता: सन्त: सूत्राशयं नियमयन्ति। कतिपयानि पारिभाषिकपदानि सन्ति येषाम् अक्षरानुकरणं विधाय आचार्यै: स्वकृतौ संस्थापितम्। परवर्त्तिनि काले तद्विज्ञानविद: अपाणिनीय- संज्ञा- भावेन तेषां व्यवहारविज्ञानमधिगम्य मतम् अवयवीकृतवन्त:। एवं च पाणिनीयसंज्ञाभावेन केषाञ्चित् सम्बन्धविधानम् आविष्कृतवन्त:। पारिभाषिकशब्दामर्थबोधनाय संज्ञासूत्राणि पाणिनिना विरचितानि। संज्ञासंज्ञीपुर:सरं तद्विवेक: साधित:,यस्याधारेण संज्ञासंज्ञीभावपुर:सरं संज्ञासूत्रमिति तल्लक्षणं प्रथितं जायते। यथा वृद्धिरादैजि[२]त्यत्र वृद्धिरिति संज्ञापदम्, आदैच् इति संज्ञीपदम् । संज्ञीपदान्येव संज्ञाया: अर्थवोधकानीति रहस्यम् ।

संज्ञा द्विविधा। कृत्रिमा अकृत्रिमा च। महाभाष्यकृता साधितम्- “किं जायेता: कृत्रिमा टि -घू भ्वादि:ह्ल[३] पुन: तेनोक्तं “इह हि व्याकरणे ये एते लोके प्रातीतपद्यर्थका: शब्दा: तै: निर्देश: क्रियते।ह्ल[४] 9कर्त्तृरीप्सिततमं कर्म“[५] कृत्रिमसंज्ञा भवति। सूत्राणां परिगणनावसरे अष्टाध्याय्यां संज्ञासूत्राणि सन्ति। या: पारिभाषिक्य: संज्ञा: वर्तन्ते ता: त्रिधा बिभाज्यन्ते। शब्दसंज्ञा-अर्थसंज्ञा-धर्मसंज्ञा इति। वृद्धि[६]-गुण[७]-संयोग[८]-सवण[९]-अनुनासिक-टि[१०]-घु[११] इत्यादय: शब्दसंज्ञायां आविर्भवन्ति। विभाषा-लोप-लुक् -प्रभृतय: अर्थसंज्ञायां प्रवर्त्तन्ते। उदात्त[१२]-अनुदात्त[१३]-स्वरित[१४]- इति धर्मसंज्ञाकोटौ परिगणनीयं जायते तेषां संघटनं कीदृशम् इत्यनेकविधं कौशलं बहि: प्रकाशनीयं वर्तते इति महाभाष्यकार: विवेचन -पुर:सरं प्रतीतौ साधयति-

१ .यत्र तु अन्यतरं लघु यत् लघु सा संज्ञा।

२. अनाकृति: संज्ञा आकृतिमन्त: सज्ञिन:।

३. आवर्तिन्य: संज्ञा: भवन्ति।

४. पूर्वोच्चारितासंज्ञी परोच्चारिता संज्ञा।

५. अधिकारात् संज्ञा सिद्धि:।

६. व्यवहारार्थ: शास्त्रे कृत: संकेत: संज्ञा।

निष्कर्षतया प्रतिभातव्यं विद्यते यत् संज्ञासूत्रे संज्ञासंज्ञीनिर्देशार्थं नास्ति कोऽपि विशेष नियम:। आचार्यस्य आचारात् संज्ञासिद्धि: इति निष्कर्ष:।

प्रयोजनानुसारं तात्पर्यवोधनेच्छृया अदृष्टानां पदानां अनुवृतिद्वारा स्वस्थापनम् अङ्गीक्रियते।तदाधारेण तद्विधानां पदानां कृते विभक्तिविपरिणामव्यवस्था अङ्गीक्रियते। अपदं न प्रजुञ्जीतं इति भाषाविज्ञानविदां विवेचनं पदप्रकल्पनेच्छया संज्ञासूत्रेषु विभक्तिनिर्देश: अङ्गीक्रियते। तथा हि लक्षीकृतम्-

१. संज्ञासंज्ञीवाचकयो: पदयो: प्रथमाविभक्तिनिर्देश:।

२. केवलं संज्ञावाचकपदे सप्तमीविभक्तिनिर्देश:।

३. भिन्नविभक्त्यन्तनिर्देश:।

पर्य्यालोचनेन प्रतिभाति यत् संज्ञासंज्ञिनो: सम्बन्ध: अभेद:। अत: अभेदान्वयसाधनाय समानाधिकरणं नियममनुसृत्य प्रथमाविभक्ति: निरुपिता विद्यते। अभेदान्वयस्य कृतं स्वसमानविभक्तिकता नियामिकाभवति। स्वस्मानविभक्तिकता प्रथमाविभक्तौ स्यात् इति न कश्चन नियम:। किन्तु उभयत्र विशेष्यविशेषणयो: एकविभक्तिकता अवश्यं भवेत्। विभक्ति निरुपण विचारावसरे कारकनिरुपणं उपपदसाधनं व्यवहारविज्ञानं वा आदाय याथार्थ्यं प्रवर्त्तते। प्रथमाविभक्ति: सर्वत्रगामिनी सर्वकारकवोधानुमोदिनी भवतीति शास्त्रीयं रहस्यम्। भट्टोजिदीक्षितादीनां केषांचित् मतेन तस्या: विभक्ते: कारकत्वं नास्ति। अर्थाभिधेयत्व मादाय तस्या: पुन: प्रवर्तनम्। अत: प्रातिपदिकार्थे प्रथमा इति नियममवलम्ब्य प्रातिपदिकार्थ... इति सूत्रेण प्रथमा विभक्ते: साधुत्वम्। स्वोपपत्तिकं साधनीयम्।अत्र भाष्यकृत: सिद्धान्त: इत्थं वर्त्तते यत् नात्र विशेषण विशेष्ययो: संज्ञा संज्ञिनो:। विशेषणविशेष्यभावस्तु लोकप्रसिद्धयोरेव। आदैच् शब्दस्तु न लोकप्रसिद्ध:। अत: इमौ शब्दौ संज्ञासज्ञिनौ एव। क: शब्द: संज्ञा, कश्च शब्द: संज्ञीति प्रश्ने महाभाष्ये “वृद्धिरादैच् ” सूत्रे उच्यते- लघुशब्द: संज्ञा, यतोहि लघ्वर्थं संज्ञाकरणं भवत। “अनाकृति:ह्न इति

वार्त्तिके अथवा अनाकृति: संज्ञा आकृतिमन्त: संज्ञिन: लोकेऽपिहि आकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा अथवा आवर्त्तिन्य: संज्ञा भवन्ति। वृद्धिशब्दश्चावर्त्तते। नादैच् शब्द:। अथवा पूर्वोच्चारित: संज्ञी परोच्चारिता संज्ञा। यद्यपि वृद्धिरादैच् सूत्रे वृद्धिशब्द: संज्ञापरक: पूवोच्चारित: परोच्चारित आदैच् संज्ञी भवति तथापि अत्र वृद्धिशब्द: मङ्गलार्थक इति वोध्यम्।

9कारके"[१५] इत्यादिषु सूत्रेषु सप्तमीविभक्ते: निर्देश: अङ्गीकृत: दृश्यते। न तु प्रथमार्थे सप्तमी। इत्यनेन भाष्यादिषु ग्रन्थेषु प्रवर्तनं लक्षीकृतमस्ति। केचनमपि तर्कयन्ति- प्राक् पाणिनीयकाले संज्ञासूत्रेषु सप्तमीविभक्ते: निर्देश: कृत: आसीत्। येषाम् अक्षरानुकरणं विधाय पाणिनिना स्वकृतौ स्थापितम्। अनुकरणं अभेदवुद्ध्या आधीयते इति विचारात् अनुरुपविभक्ति निर्देश: पाणिनौ प्राक् पाणिनीयकृत्वनुकरणबलात् कृत: इति विवेक:। तत्र मुख्यत: सप्तम्यन्तसंज्ञायामिति सूत्रमाध्यमेन संज्ञाशब्दस्य प्रयोग: पाणिनिना साधित:। विभिन्नेषु अर्थेषु संज्ञाशब्दानामुपपन्नं पाणिनीयतन्त्रे दृश्यते, तत्र रहस्यं तु केवलं 9संज्ञायाम्" इति सूत्रे सप्तमीविभक्तिनिर्देशेन विविधा: विषया: साधिता: ।यथा अष्टाध्यायां द्वितीयाध्यायस्य प्रथमपादस्य चतुश्चत्वारिंशत्तमे संज्ञायाम्[१६]-२/१/४४ इति सूत्रे नित्यसमासविधानप्रसङ्गे सप्तमीविभक्ते: निर्देशेन सुप्सुपासमास: साधित: ।यथोक्तं तत्र संज्ञायाम्-इति सूत्रे - अत्र वाक्ये संज्ञानवगमात् नित्यसमासोऽयम्। सप्तम्यन्तात् संज्ञायाम् सुपासमास:। एवं प्रकारेण पाणिनीये केवलं सप्तमीविभक्तिप्रयुक्तानि 9संज्ञायाम्" इति द्वादश सूत्राणि वर्त्तन्ते यथा-

**१. संज्ञायाम्-२/१/४४**

अत्र वाक्ये संज्ञानवगमात् नित्यसमासोऽयम्। सप्तम्यन्तात् संज्ञायाम् सुपासमास:, अरण्ये तिलका:। वने किंशुका: , वने विल्वका: इति।

**२. संज्ञायाम्- ४/१/७२**[१७]

कद्रुकमण्डल्वो: संज्ञायां स्त्रियाम् ङ कद्रू: नागानां समूह: विनताया: पुत्री वा इति संज्ञा विशेष:। कमण्डलू: कस्यचित् मृगस्य संज्ञाविशेष:।

**३. संज्ञायाम्- ४/३/११७**[१८]

उपज्ञात: कृतेग्रन्थे इति सूत्रयो: अर्थविषयक:। पाणिनिनोपज्ञात: पाणिनीयम् वररुचिना कृत: ग्रन्थ: वाररुच:। तत्र तेन इत्येव अग्रन्यार्थमिदं संज्ञायाम् मक्षिकाभि: कृतं माक्षिकं मधु:।

**४. संज्ञायम्- ८/२/११**[१९]

मतोर्मस्यवः संज्ञायाम् अहीवती मुनीवती

**५. संज्ञायाम्- ३/४/४२**[२०]

अधिकरणेवन्धः इति अधिकरणे उपपदे वन्ध् धातोः यण्णमुल् विधीयते तत् अनधिकरणार्थम् संज्ञाय्म् वर्त्तते। क्रोञ्चबन्धम् मयूरिकाबन्धम्, बन्ध विशेषाणां संज्ञा।

**६. संज्ञायाम्- ३/३/१०९**[२१]

धातोर्ण्वल् स्यात् संज्ञायाम्। वरणपुष्प प्रवाहिका। वरणः वृक्षविशेषस्य संज्ञा अभ्यूषस्वादिका अभ्यूषपूरिका। अभ्यूष अपूपविशेषस्य संज्ञा। रोगाख्यायां ण्वुल् बहुलम्। इति बहुल भावस्य संज्ञायाम् नित्यं ण्वुल्।

**७. संज्ञायम्- ६/२/१५९**[२२]

संज्ञायाम् आक्रोशे गम्यमाने नञः परमोदात्तत्वम्। अदेवदत्तः आक्रोसे इदं प्रयुज्यते।

**८. संज्ञायाम्- ५/३/९५**[२३]

इवार्थेकन् स्यात् , समुदायश्चेत् संज्ञा गम्यते। अश्वसदृशः अश्वकः ,अत्र सादृश्यार्थकः।

**९. संज्ञायाञ्च- ६/२/७७**[२४]

"शिल्पिनि चाऽकृञः॒ इति शिल्पिवाचिनी समासे अण्णन्तेपरे पूर्वमाद्युदात्तम् ।अचेदण् कृञः परो न भवति। संज्ञायान्तु अण्णन्ते परे अपि आद्युदात्तं न भवति. रथकारोनाम ब्राह्मनः, तन्तुवायो नाम् कृमिः।

**१०. संज्ञायाम्- ५/३/८७**[२५]

ह्रस्व हेतुका या संज्ञा तया गम्यमानायां कन् स्यात्- वशकः, वेणुकः इत्यादि

**११. संज्ञायां कन्- ४/३/१४७**[२६]

"पिष्टात्॒ सूत्र विहित विकारार्थक मयटः स्थाने कन् प्रत्ययः संज्ञायाम्। पिष्टस्य विकारविशेषः पिष्टकः। पूपोऽपूपो पिष्टकः स्यात् इति कोशात्।

**१२.. संज्ञायां कन्- ५/३/७५**[२७]

कुत्सिते कन् स्यात् संज्ञायां गम्यमानायाम्। शुद्रकः राधकः।

एवमन्यत्रापि नानार्थेषु संज्ञाशब्दोपपन्नं पाणिनीयतन्त्रे दृश्यते। "शामि धातोः संज्ञायाम्‌‍ इत्यत्र संज्ञा शब्दः नाम परकः , "दिक् संख्ये संज्ञायाम्‌‍ इति सूत्रेण "सप्तर्षि‍ इति वशिष्ठादि ऋषीणामाख्यानम्।

"संज्ञायां ललाट कुक्कुटौ पश्यति" ४/४/४६ इति सूत्रे संज्ञायामिति अभिधेयायामित्यर्थस्य वाचकः। तेन लालाटिकः कौक्कुटिकः इति प्रयोगः। एवमन्यत्रापि नानार्थेषु संज्ञाशब्दोपपन्नं पाणिनीयतव्याकरणे दृश्यते।

संज्ञापदप्रयोगविज्ञाने आचार्यव्यवहारः मार्गद्वयेन कांक्षितः एकः संज्ञानुकरणात्मकः मार्गः अपरस्तु सूत्रकृतसंघठनकौशलात्मकमार्गः अनुकरणपक्षे यादृशः विभक्तिनिर्देशः साधितः। अपरस्मिन् पक्षे स्वयं पाणिनिना यत्नः विहितः तदा पदसाधुत्वसम्पादिका प्रथमा सर्वथा उपपन्ना इति विचारवुद्ध्या प्रथमाविभक्तेः प्रयोगः अवधारितः। वचननिर्देशे किमपि वैचित्र्यं अवलम्बितं तत्तु भिन्नं कोटिकम् अन्विष्टव्यं उद्देश्यम्। केषाञ्चित् संज्ञासूत्राणां परिभाषासूत्रेणापि व्यवहारः शास्त्रसिद्धा चर्चितः, तत्र विभक्तिनिर्देशे विशेषतापि अवलम्बिता जायते। इत्थं पाणिनीयं शब्दानुशासनं विचित्रेण पथा अन्वेष्टव्यं वर्तते। भाष्यकृता परीक्ष्य उत्थापितः सर्ववेदपारिषदमिदशास्त्रं तत्र नैकपन्थाः शक्य आस्थातुमिति।

# प्रेतादिदेहसम्बन्धा:

डा.उमाराहुल

उत्क्रान्त: पृथगात्मा देहात् प्रेत:[१] परेतसंज्ञोऽसौ।
सम्बद्धः पुनरेवं देहान्तरविक्रम: क्रमते।।१।।
प्रविशति साधु निविशते ह्याविशतीवान्यदेहसंक्रान्त:।
उपविशतीव सदेहोऽध्वनि वा स्थूणासु संकल्पै:।।२।।
कल्पविकल्पसुकल्प: परिकल्पो वा परागत: कल्पै:।
संकल्पितकल्पनया प्रकल्पकुल्याकलापीव।।३।।
मृतदेहात् पृथगात्मा ख्यात: क्षेत्रे सदैव संसारे।
ये जीवन्ति नु लोके तेषां चित्ते स वै प्रेत:।।४।।
प्रेतो निवसति नात्मा कुत्र कथं केन कस्य कस्मै वा।
कस्मात् कस्मिन् वर्त्मनि भावाभावौ सुझञ्झौ हि।।५।।
प्रेत: कथमिह निवसति चित्ते पित्ते नु जीवितानां क:।
योऽसौ मृतोऽथवाऽसौ जीवनकालेऽनुभावाढ्य:।।६।।
भावा: परिभवशून्या ये च विभावा : पराभवानन्दा:।
अरणिचरणरणनिकया ह्यनुभावा येऽनलास्ते हि।।७।।
प्रेतानां या संस्थाऽऽत्माऽटति कतिधा तया विधानेन।
मृगतृष्णाभयभीता मृगीव गङ्गातटेऽटन्ती।।८।।
आपन्न:[२] सम्पन्नो विपन्नजीव: कथं स्वयं प्रेत:।
कर्मभिरयं रथाशयदेहं गेहं विना विहग:।।९।।
आवर्तच्छलजालैर्नालङ्कुरुते तमालजम्बालम्।
तामालिकमलकेव प्रिये ममल्ले तमालं य:।।१०।।

देहेन हि सम्बन्धस्तुष्ट्यै पुष्ट्यै तथैव सञ्जुष्ट्यैः।
आत्मान्तररचितदेहैर्भुजगं इवायं कथं जारः।।११।।
संस्थाप्रेतपरेयं स्वयं परेता सुबुद्बुदा जलजा।
संतिष्ठते न भीत्या केवल आत्मा स वै प्रेतः।।१२।।

---

**सन्दर्भाः**


१. भागवत.-७.१४.२६ ।
कूर्मपु. -३३.१६ ।
वामनपु.- ७९.२०,२१,३० ।
मत्स्यपु. -१८.१६,१७.२५,१९.३,८ ।
कठोप. १.१.२० ।
२. वामनपु.- ७९.५६ ।


*मार्फत - रोपितराहुल,*
*शास्त्रीनगर, मेरठ (यु.पी.)*

# श्रीमद्भगवद्गीतादर्शनम्

डॉ. युधिष्ठिरसाहु:

१.०.०

विषयसुखसर्वस्वमन्यमान्या: मानवा: संसारानन्ददग्धींभूता: सन्तोऽपि तद्विरक्ता: न भवन्ति। तस्मात् विविधेषु योनिषु जन्ममृत्युचक्रेषु निपतन्त: दु:खानि प्राप्यन्ते। एवंभूतानां जनानां कल्याणसाधनार्थंपरमानन्दप्राप्तयेच मुक्तिकामिनां कृते भगवच्छ्रीकृष्णमुखानि: सृता वाणीगीतात्वेन अभिहिता विश्वप्रसिद्धा च। तत्र व्याख्याकारै: वेद: भगवत: नि:श्वासरूपेण वाणी तस्य गीतात्वेन चाख्यातौ इति स्वीकृता। नि:श्वास: स्वाभाविकतया नि: सरति। परन्तु योगस्यावस्थायां गीता विविक्ता। अतो वेदात् गीताया: महत्त्वं साधिकं वर्तते। तस्मादुच्यते महाभारतमहापुराणे यथा-

न शक्यं तन्मयाभूयस्तथा वक्तुमशेषत:।
परं हि ब्रह्म कथितं योगयुक्तेन तन्मया।।[१]

दृश्यते ज्ञायते अनेनेति दर्शनम् इति करणार्थे दृश्यते इति दर्शनमिति भापक्षे वा दर्शनपदं व्युत्पाद्यते। तद् यस्मिन् पक्षे भवतु नाम जगत: सृष्टि: जीवब्रह्मणो: सम्बन्ध: सुकदु:खयो: चेत्यादीनां तत्त्वानि निगदितानि विविधेषु दर्शनशास्त्रेषु ।परन्तु गीतायां तानि नैव निरूपितानि, तानि तु अनुभूयन्ते एव। तस्मात् सर्वाणि दर्शनानि गीतायामन्तगीतानि । न तु गीता कस्मिन् दर्शने अन्तर्भूयते। एतादृशं भावमङ्गीकृत्यात्र शोधप्रबन्धे श्रीमद्भगवद्गीतायां सर्वदर्शनोपजीव्यत्वं विविच्यते।

अत्र सर्वदर्शनपदेन यद्यपि आस्तिक-नास्तिकानां बोध: सम्पस्यते। तथापि वेदास्तित्वस्वीकृतानमास्तिकानां दर्शनानां दृष्टि: गीतासम्भूता इति सम्पाद्यते सयुक्तिकम्। न त्वत्र सर्वपदेन नास्तिकानां ग्रहणं कृतं वर्तते।

**१.१.१. वैशैषिकदर्शनस्योपजीवत्वम्-**

कणादमहर्षिप्रणितस्य वैशेषिकदर्शनस्य सिद्धान्तानुसारेण द्रव्यादिसप्तपदार्थानां तत्वाज्ञानेन नि:श्रेयसोऽधिगम: सम्भवेत् इति विचार: प्रकटित:। द्रव्य-गुण-कर्म-सामान्य-विशेष- समवाय- भावपदार्था: प्रागभाव-प्रध्वंसाभाव-अत्यन्ताभाव- अन्योन्याभअव इति अभावत्वेनाङ्गीकृत्य पदार्था: विश्लेषिता: तत्र वैशेषिकदर्शने गूताया: दशमाध्याये वर्णितं

विभूतिवर्णनमाधारीकृत्य स्वीकृता इति विचारोऽङ्गीक्रियते चेन्न हानि:।

अणुकद्व्यणुकादिक्रमेण जगदिदं सृष्टिमति यदुक्तं वैशेषिकै: तत्तु जीतायं स्थितस्य विभूतिवर्णनमवलम्ब्य । गीताया: दशमाध्यायस्य विंशतिश्लोकत: ऊनचत्वारिंशत् श्लोकपर्यन्तं द्वि-अशीति विभूतिवर्णनायां प्राप्यते। तत्र सर्वत्रैव परमात्मस्वरूप: भगवान् श्रीकृष्ण: विद्यते। तस्मादुच्यते- यच्चापिसर्वभूतानां बीजं तदहमर्जुन।

न तदस्ति विना यत्स्यान्मया भूतं चराचरम्।।[२]

तत्र सर्वत्रैव विभूतिषु चराचरेषु भगवान् विद्यमानत्वात् दृश्यमानपदार्थासत्वेन सद्ज्ञानेन परंब्रह्म ज्ञाननैव मुक्तिरिति यद् गीतायां प्रोक्तं तदत्र वैशेषिकदर्शने वर्णितम्। अत: वैशेषिकदर्शनस्योपजीव्यत्वं प्रमाण्यते।

वैशेषिकदर्शने द्रव्यपदेन क्षित्-अप्-तेज्-मरुत-व्योम-काल-दिग-आत्म चेति नवद्रव्याणि उदिरीतानि तान्येव गीताधारेणावलम्बितानि। तदर्थं निम्नोक्तानि पदानि विविक्तव्यानि गीतावचनेषु । तद्यथा-

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान्।
मरीचिर्मरूतामस्मि नक्षत्राणामहं शशी।। (गीता.१०/२१)

मन:- इन्द्रियाणां मनश्चास्मि भूतानामस्ति चेतना। (गीता. १०/२२)

अत्रेन्द्रियाणां तथा च मनस: ग्रहणात्तद्ग्रहणम्।

काल:- मासानां मार्गशीर्षाऽहमृतानां कुसुमाकर:।। (गीता.१०/३५)

अत्र मासपदेन बाल्यस्य ग्रषणम्।

तेज:- द्युतं छलयतामस्मि तेजतेस्विनामहम्।। (गीता.१०/३६)

एवं क्रमेण द्रव्याणां ग्रहणप्रभृतीनां यद् ग्रहणमस्ति। तेषां ग्रहण गीतायामाधारीकृतैव विद्यते। अत: वैशेषिकदर्शनस्योपजीव्यता सिद्ध्यति।

**१.२.०. न्यायदर्शनस्योपजव्यता गीता-**

अत्र न्यायदर्शने गौतममुनिना 'दु:खजन्मपवृत्तिदोषमिथ्याज्ञानामुत्तरोत्तरापाये तदन्तरापायादपवर्ग:' इति अपवर्गस्योपायकथनावसरे[३] प्रमाण-प्रमेयप्रभृतीनां षोडशपदार्थानां ज्ञानेनैव मुक्तिरिति अभिहितम्।

**१.२.१. प्रमाणम्-**

प्रत्यक्षानुमानोपमानशब्दाख्यानां चतुर्णां प्रमाणानामाधार: गीतऽस्ति इति न संशय:। अर्जुनस्य यथार्थज्ञानमुत्पादयितुं भगवता श्रीकृष्णेन विविधै: दृष्टान्तै: यद् प्रमाणमुपस्थापितं तदेव तेषामाधारत्वस्य प्रमाणम्।

**१.२.२. प्रमेय:-**

आत्मशरीरीन्द्रियार्थबुद्धिमन: प्रवृत्तिदोषप्रत्यभावफलदु:खापवर्गा: द्वादशप्रमेया:। गीतामाधारीकृत्यैव उतेवाम् उपस्थापनं गौतमेन कृतमिति निम्नोक्तदिशा विश्लेषणेन प्रतिपाद्यते।

यथा-

**शरीर:-** शरीरविषये गीतायामुक्तं यथा-

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिधीरस्तत्र न मुह्यति।।[४]

अत्र देहशब्द: शरीरपर्यायवाचकोऽस्ति। शरीराणि जायन्ते वर्द्धते लीयन्ते चेत्यादय: अवस्थाभेदेन परिज्ञायन्ते। अन्तवन्त: इमे देहा..(२/१८) पदेन शरीराणि नाशशीलानि सन्ति। एतदाय न्यायदर्शने शरीरलक्षणं क्रियते तावत् - भोगायतनमन्त्यावयवि शरीरम्[५]

**आत्मा-** यदात्मा न्यायदर्शने प्रमेयत्वेन स्वीकृत: तस्य धर्मवर्णनायां गीतायामुच्यते।

तथाहि- नजायते म्रियते कदाचिन्नायं भूत्वा भविता वा न भूय:।
अजो नित्य: शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।।[६]

अत्र शरीरपदेन अत्मन: बोध:। यद् न जायते , नवर्तते, नाम्रियते वा । परन्तु शरीरे तानि दृश्यते।ाथ: आत्मा जन्मरहितं, नित्यम्,शाश्वतम्, पुराणं, (अनादि:) च भवेत्। एवंरुपेण बहव: श्लोका: अत्र गीतायां प्राप्यन्ते।

एतद् सर्वमादाय न्यायशास्ते् आत्मन: लक्षणं क्रियते तावत्- “आत्मतत्त्वसामान्यवान् आत्मा। स च देहेन्द्रियादिव्यतिरिक्त: प्रतिशरीरं भिन्नो नित्यो विभूश्च”[७]।

इन्द्रियम्- न्यायदर्शने घ्राण-रसन-चक्षु-त्वक-श्रोत-मनांसि इति षड् इन्द्रियाणि तेषाइ विषयाश्च वर्णिता:। तेषा माधारोऽपि गीतायां प्राप्यते। सर्वेषां प्रमेयप्रभृतीनां वर्णनं गीतायां प्राप्यते। अत: वैशेषिकदर्शनस्यापि आधारत्वेन गीता स्वीक्रियते।

**१.३.०. सांख्यदर्शनस्योपजीव्यता-**

भारतीयपरम्परायां कपिलमुनिविरचितस्य सांख्यदर्शनस्य महत्वां सर्वविदितमस्ति। तत्र गृहीतेषु पञ्चविंशतिपदार्थेषु प्रकृतिपुरुषयोर्भेदज्ञानमेव तत्त्वज्ञानं, तस्माद्धि मुक्ति:। प्रकृति: जडपदार्थ:। पुरुष: चेतनपदार्थ: सच्चिदानन्दस्वरूप:। तस्मादुच्यते-

प्रकृतिं पुरुष चैव विद्यनादी उभावपि।
विकाराश्च गुणाश्चैव विद्धि: प्रकृतिसम्भवान्।।[८]

कार्यकरणकर्त्तृत्वे हेतुः प्रकृतिरुच्यते।

पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरिच्यते।।[९]

अत्र आकाशः, वायुः, अग्निः, जलम्, पृथिवी, शब्द, स्पर्शः, रूपः, रसः, गन्धश्चेति दश कार्यम्। कर्ण-त्वक्- नेत्र-रसना-घ्राणं चेति अन्तः करणं वाक्, पाणि, पायुः, उपस्थश्चेति बहिकरणत्वेन एतानि एकूेपाणि सन्ति। अपि च मन, बुद्धिः, अहङ्कारः चेति कारणं स्वीकृत्य करणत्रयं यद् नीतायां वर्णितं तत्सर्वं सांख्यदर्शने गृहीतम्।

अपि च सांख्यकारिकायां सत्त्वरजस्तमसां स्वरूपविषये प्रत्यप्रीतिविषादात्मकाः "प्रकाशप्रवृत्तिनियमार्थाः अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः" [१०] इति यदुक्तं तत्सर्वमेव गीतायामादौ उक्तम्। तथाहि-

तत्र सतत्वं निर्मलत्वात् प्रकाशकमनानयन्।

सुखसङ्गेन वध्नाति ज्ञानसङ्गेन चानघ।।[११]

'रजो रागात्मकं विद्धि' (१४/७) तमस्त्वज्ञम्जं विद्धि (१४/८) इत्यादिरूपेण गुणत्रयाणां स्वरूपं प्रोक्तम्।

इत्थमेव सांख्यकारिकायाः सर्वाणि तत्त्वानि गीतायाः आगतानि इति कृत्वा गीतायाः सांख्यदर्शनोपजीव्यत्वं सिद्ध्यति।

**१.४.०. योगदर्शनस्योपजीव्यता-**

महर्षिपतञ्जलिना 'चित्तवृत्तिनिरोधः योगः' [१२] इति योगदर्शने प्रोक्तं योगलक्षणम्। ततः षाड्विंशतिपदार्थानां तत्त्वज्ञाननैव मुक्तिः इति विचारः प्रकटितः। सांख्यदर्शनगृहीतैः पञ्चविंशतिपदार्थैः साकम् ईश्वरं समीप्य षाड्विंसतिपदार्थाः। अतः मनसः निग्रहः, ईश्वरस्वरूपविषये योगदर्शनं यादशं वर्णनं प्राप्यते। तत्सर्वमेव गीतातः गृहीतमिति विचारे न हानिः।

ईश्वरविषये सांख्यदर्शने उच्यते यथा- "क्लेश-कर्म-विपाका-शयैरपरामृष्टः पुरुषविशेषः ईश्वरः"[१३]।

गीतायाम् ईश्वरशब्दः वहुवारः उच्चारितः। गीतायां यथा-

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मल फलम्।

रजसस्तु फलं दुःखज्ञानं तमसः फलम्।।(१४/१६)

पुनश्च- शरद्रं यदवाप्नोति यज्जाप्युत्क्रामतीश्वरः।।(१५/८)

एतेषां प्रयुक्तानां श्लोकानां मध्ये स्थितस्य ईश्वरशब्दः तदर्थवाचकः। योगदर्शने मनसः निग्रविषये यथा गुरुत्वं वर्तते। गीतायामपि तथा प्राप्यते। यथा-

चञ्चलं हि मन: कृष्ण: प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।
असंशयं महावाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।[१४]

वैराग्यपूर्वकम् अर्थात् निरासक्तपूर्वकं यदि अभ्यास: क्रियते चेत् मनस: निग्रह: सम्पद्यते। अत: योगदर्शने उच्यते यथा-

"अभ्यासवैराग्याभ्यां तन्निरोध:"[१५]।

एवमपि "यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयोऽष्टी अङ्गानि" [१६] इति वर्णितानि अष्टाङ्गिकमार्गा: अपि गीतायां [१७] प्राप्यते। एतत्सर्वमाकल्य योगदर्शनमपि गीताया: उपजीव्यत्वं भजते।

**१.५.०. मीमांसादर्शनस्योपजीव्यता-**

महर्षिजैमिन: मीमांसादर्शने 'कर्मैव ब्रह्म' इति उक्तवान्। अत्र कर्मपदेन यागयज्ञादिकर्मानुष्ठनस्य बोध:। यथा - एक: कवि: साग्नीं (उपकरणम्) विना काव्यं लिखितुं समर्थो न भवति। तथैव मुक्तिकामिना पुरुषेण निष्कामकर्मानुष्ठानं करणीयम्। यद् एव यज्ञपदे नाभिधीयते।गीतायामपि कथ्यते। यथा हि-

गतसङ्गस्य मुक्तस्य ज्ञानवस्थितचेतस:।
यज्ञायाचरत: कर्म समग्रं प्रविलीयते।।(गी.४/२३)

अर्थात् नि:श्वार्थपरेण परहितार्थं कृतं कर्म नाम 'यज्ञ' इति प्रोच्यते। अपि चोच्यते गीतायाम्-

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।
स्वाध्यायज्ञानमयज्ञाश्च यतय: संशितव्रता:।।(गी.४/२८)

तत्र द्रव्ययज्ञ:, तपोयज्ञ:, ज्ञानयज्ञ:, चेति संशितव्रतपदेन अवबोध्यते। अत्र प्रसङ्गे चतुर्थाध्यायस्य २४त: ३० श्लोकमध्ये १२ यज्ञा: प्रोक्ता: यथा-

| | |
|---|---|
| १. ब्रह्मयज्ञ: | ७. द्रव्ययज्ञ: |
| २. भगवदर्पणरपक: यज्ञ: | ८. तपोयज्ञ: |
| ३. शभिन्नतारूपक: यज्ञ: | ९. योगयज्ञ: |
| ४.संयमरूपक: यज्ञ: | १०. स्वाध्यायरूपक यज्ञ: |
| ५. विषयहवनरूपक: यज्ञ: | ११. प्राणायामरूपक: यज्ञ: |
| ६. समाधिरूपकं यज्ञ: | १२. स्तम्भवृत्तिप्राणायामरूपक: यज्ञ: |

अस्मात् विश्लेषणाज्ज्ञायते- मीमांसादर्शनस्य तत्वानि गीताया: एव प्राप्यन्ते।

तस्मात् दर्शनस्यास्योपजीव्यता गीता इति प्रामाण्यते।

१.३.०. वेदान्तदर्शनस्योपजीव्यता-

वेदान्तदर्शने व्यासदेवेन चिदचिद्भेदेन द्वौ पदार्थौ स्वीकृतौ। ब्रह्मैव चित्, तदातिरिक्ता ये ये पदार्था: जडभूता: सन्ति। तत्र ईश्वरेण साकं योग एव मुक्ति: सा सायुज्यमुक्तिरिति उच्यते। यत्र मायात्नकेनाविद्यात्मकेन वा उपाधिना रहित: सन् केवलं परब्रह्मस्वरूपेणैवावस्थीयते। तामेव मुाक्तिं कैवल्यमुक्तिरिति वदन्ति। ब्रह्म सत्यं जगन्मिथ्या इति तेषां सिद्धान्त:। माया नाम अज्ञानमेव जगत्कारणमस्ति। यअथ राजौ सर्प प्रतीतिवत्। मायापरसरितौ रज्जुज्ञानं यथअ जायते। तथैव मायापसरितौ जगत्- ज्ञान भावे सर्वमेव ब्रह्म एच्यते। एते सिद्धान्ता: गीता गृहीता ंति निम्नोक्तवचनप्रमाणामुत्पत्तिप्रसङ्गो भगवता उच्यते तथा-

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।

अहं कृत्स्नस्य जगत: प्रभव: प्रलयस्तथा।।(गी.७/६)

अर्थात् परा-अपरा -प्रकृत्यो: संयोगैव जगदुत्पत्ते: कारणं स्यात्. जगत: प्रतीति:, प्रलयादिकश्च, तत्सर्वनेव वासुदेवसर्वमिति (७/१९)विचारवद् भवेत्। वेदान्तदर्शने वर्णितं शमदमादिषट्सम्पत्तिविषयोऽपि गीताया: गृहीत:। निम्नोक्तश्लोकविश्लेषणेन तज्ज्ञायते। तथाहि-

सङ्कल्पप्रभावान् कामांस्त्यक्त्वा सर्वानशेषत:।

मनसैवेन्द्रियग्रामं विनियम्य समन्तत:।।(६/२४)

अत्र मनस: साहाय्येन इन्द्रियाणां निग्रह: कर्तव्यमिति यदुक्तम्... तदेव दमरूपेण गृहीतम्-

"ब्राह्योन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम्"।[१८]

अपि च-

शनै: शनैरूपरमेद्बुद्ध्या धृतिगृहीतया।

अत्मसंस्थं मन: कृत्वा न किञ्चिदपि चिन्तयेत्।।(६/२५)

अत्र श्लोके संसारात् निगृहीतस्य मनस: परमात्मनि स्थापनं यदुक्तम्। तदेव वेदान्ते उपरिति पदेन गृहीतं दृश्यते। यथा - "निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणुमुपरिति: अथवा विहितानां कर्मणां विधिना परित्याग: उपरिति: इत्युव्यते"।[१९]

एवमेव सर्वाणि उपादानानि यानि यानि वेदान्तदर्शने स्वीकृतानि। तानि सर्वाणि श्रीमद्भगवद्गीतत: अगतानि इति विचार: फलित:।

**समीक्षा-**

सर्वोपनिषद्गाव: दोग्धा गोपालनन्दन: इत्यादि वचनानुसारे सर्वेषाम् उपनिषदां मूलभूता गीता यदि स्यत् । उपनिषदादि वचनगृहीतानं नाम आस्तिकदशीनानां आधार: श्रीमद्भगवद्गीता भवेत्। गीता दर्शनानां तत्र सर्वेषां दर्शनानां तत्वानिप्राप्यते। तावत् प्रमाणमत्र शोधप्रवन्धे सोदाहरणमालोचितम्। अत एव गीताया: सर्वदर्शनोपजीव्यत्वमनेन साधीयते इति दिक्।

**सन्दर्भा:**


१.महाभारतम्,आश्व.१६/१२-१३, २. गीता१०/३९

३. प्रमाण -प्रमेय- संशय- प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति -निग्रहस्थानरूपा- न्यायदर्शनम्।

४.गीता२/१३

५. तर्कभाषा प्रमेयनिरूपणम्।

६. गीता- २/२०

७. तर्कभाषा प्रमेयनिरूपणम्।

८. गीता१३/१९

९. गीता १३/२०

१०. सांख्यकारिका श्लो.१२

११. गीता-१४/०६

१२. योगदर्शनम्।

१३.योगदर्शनम्।

१४. गीता ६/३४-३५

१५. योगदर्शनम्।

१६. योगदर्शनम्।

१७. गीता ४/२९-३०

१८. वेदान्तसार:।

१९. वेदान्तसार:।



*सहायकाचार्य:, संस्कृतविभाग:,*

*रेभेन्साविश्वविद्यालय:, कटकम्*

# भविष्यपुराणे पर्यावरणचिन्तनम्

डॉ. मखलेशकुमारः

**शोधसारांशः –**

वर्तमानकाले पर्यावरणसमस्या सर्वत्र दरीदृश्यते। परितः आवरणं पर्यावरणमिति। वस्तुतः पर्यावरणशब्दस्तु पुराणेषु न प्राप्यते, परन्तु तत्र अष्टावरणानि उत् वा सप्तावरणानि प्रतिपादितानि। पृथिवी-जल-तेज-वायु-आकाश-महत्तत्त्वाङ्कोरति सप्तावरणानि। प्रकृतेः संयोजनेन एतानि अष्टावरणानि भवन्ति। एतेषामावरणानां महत्त्वं मानवजीवनस्य कृते बहु अस्ति। आवरणानां सम्वर्धनेन संरक्षणेन च सृष्टेरस्तित्वं भवितुं सम्भाव्यते। अतः ब्रह्माण्डस्य घटकभूतानां पृथिवीत्यादितत्त्वानां विषये भविष्यपुराणे यद्विचारितं तदस्मिन् शोधपत्रे प्रस्तूयते।

यद्यपि विश्वस्तरे परिचर्यमाणा पर्यावरणसंरक्षणचिन्तायाः चर्चा न बहु प्राक्तना तथापि विगतशताब्दीषु बाधरहितजनसंख्यावृद्धया, अरण्यानां विनाशपरिणत्या वनोद्भवानां प्राणिनामविरलगत्या प्रणाशेन औद्योगीकरणस्याविवेकपूर्णविस्तारेण प्रकृतेः सन्तुलनावरोधेन च जनानां कृते शुद्धजलस्य वायोः तथान्यवस्तूनामुपलब्धिस्तु अतीव कठिना जाता। ऋतम्भराप्रज्ञासम्पन्नैः अस्माकं ऋषिमुनिभिः अनेनैव कारणेन प्राचीनकाले एतादृशी जीवनपद्धतिः विकसिता। यया पद्धत्या सुखमयजीवनं यापयितुं समर्थो भवेत् एतदर्थमेव पुराणवाङ्मये इष्टापूर्तकर्मणां महत्ता व्यापकता च प्रतिपादिता विद्यते। वैदिकवाङ्मयस्य भाषाकाठिन्यात् सर्वसाधारणजनदुरूहत्वात् पुराणान्येवास्माकं कृते अवलम्बभूतानि।

अस्मिन् क्रमे भविष्यपुराणे विस्तृता पर्यावरणसम्बद्धा महत्वपूर्णा चर्चा प्राप्यते। वर्तमानसन्दर्भे पर्वत-नदी-वन-पशु-पक्षि-वायुमण्डलानि मिलित्वा पर्यावरणं रचयन्ति। अतः एतेषां समानरूपेण विकासेन वयं स्वकीयं पर्यावरणं संरक्षितुं समर्थाः भवामः। पर्यावरणदृष्ट्या पादपाः महत्वपूर्णं स्थानं भजन्ते। एते न केवलमस्माकं दैनिकीं व्यावसायिकीमौद्योगिकीम् आवश्यकतां पूरयन्ति अपितु भूकम्प-वात-वृष्ट्याद्यनेकासु दैवीषु आपदासु साहाय्यमपि कुर्वन्ति। वनोपवनवाटिकायाः समारोपणे द्रुमाः एव प्रयुक्ताः भवन्ति। भविष्यपुराणस्य मध्यमपर्वणि वृक्षाणां गुणधर्मस्य विषये मानवजीवनोपरि तेषां

प्रभावस्य तथा च एतेषां रोपण-सम्वर्धन-संरक्षणविधेश्च सूक्ष्मविश्लेषणं कृतं वर्तते। पर्यावरणसंरक्षणदृष्ट्या भविष्यपुराणीयाः बहवः प्रसङ्गाः विचारणीयाः स्युः। पूर्तकर्मनिरूपणप्रसङ्गे वृक्षारोपणस्य कार्यमतीव महत्वपूर्णं निगदितम्। यतो हि यस्य कस्यापि वृक्षस्य यत्र कुत्रापि संरोपणं कल्याणकरं पर्यावरणसंरक्षकं च न भवति। प्रकृत्या समुत्पन्नः पुराणनिर्दिष्टनियमानुसारं संस्कारितः संरोपितः वा तरुः कल्याणकारी भवितुमर्हति।

भविष्यपुराणस्य मध्यमपर्वणि पूर्तकर्मनिरूपण-प्रसङ्गे अन्तर्वेदीय-बहिर्वेदीय-भेदेन कर्मद्वयं प्रकीर्तितम्। ज्ञानसाध्यानि कर्माणि अन्तर्वेदीयानि भवन्ति। पूर्तकर्मणां गणना बहिर्वेदीयकर्मसु क्रियते। वापी-कूप-तडागादीनां निर्माणं वृक्षलतादीनां संरोपणं बहिर्वेदीयकर्माणि अभिधीयन्ते, तत्रापि वृक्षस्यारोपणं महत्त्वपूर्णमिति। भविष्यपुराणस्याभिमतं यत् पूर्त्तकर्मणः परिपालनं राज्ञः परमं श्रेष्ठं कर्त्तव्यमिति। यथा-

**अन्तर्वेदिं प्रवक्ष्यामि ब्रह्मणोक्तं युगान्तरे ।**
**बहिर्वेदं तथैवोक्तं शस्त्रं स्याद् द्वापरे कलौ ।।**
**ज्ञानसाध्यं च यत्कर्म अन्तर्वेदीति कथ्यते ।**
**देवता स्थापनं पूजा बहिर्वेदिरुदाहृता ।।**
**प्रपापूर्तादिकं चैव ब्राह्मणानां च तोषणम् ।**
**गुरुभ्यः परिचर्या च बहिर्वेदी द्विधा मता ।।**
**अकामेन कृतं कर्म कर्म च व्यसनादिकम् ।**
**अन्तर्वेदी तदेवोक्तं बहिर्वेदी विपर्ययः ।।**
**धर्मस्य कारणं राजा धर्ममेतद्भवेन्नृपः ।**
**तस्मान्नृपं समाश्रित्य बहिर्वेदी ततो भवेत् ।।**[१]

जलमिति प्रकृतिप्रदत्तोपहारः, अस्य अपरं नाम जीवनमिति। सामान्यरूपेण यत्र कुत्रापि जलप्रवाहेण जलावरोधेन च जलं दूषितं भवति। जलस्य अविवेकपूर्णोपयोगेन लाभस्थाने हानिरेव भवति। पर्यावरणसंरक्षणदृष्ट्या वृष्ट्या प्राप्तजलराशेः निर्मलीकरणार्थं पूर्तकर्मणि नूतन-वापी-कूप-तडागानां निर्माणं निर्दिष्टं वर्तते। "रोचनार्थाः फलश्रुतिः" इत्यनुसारं तादृशस्य निर्माणकार्यस्य कृते महत्पुण्यमुद्घोषितम्, येन जनाः अस्मिन् सत्कार्ये प्रवृत्ताः भवेयुः तथा येन प्रकृतिप्रदत्तोपहारस्यास्य जलस्य सुरक्षा स्यात्। नूतनवापीकूपतडागानां निर्माणेन पुण्यलाभः भवत्येव ततोऽधिकं पुण्यं जीर्णवापीकूपतडागानामुद्धारेण समुद्घोषितम्। जीर्णकूपादीनामुद्धारकर्ता न केवलं स्वोद्धारं करोति अपितु स्वकीयं सम्पूर्णं कुलं तारयति इति भविष्यपुराणस्य दृढाभिमतम्। यथा –

**अथ वा देवमानेन कर्त्तव्यं भूतिमिच्छता ।**
**यस्तडागं नवं कृत्वा जीर्णं वा नवतां नयेत् ।।**
**सर्वं कुलं समुद्धृत्य स्वर्गलोके महीयते ।**
**वापीकूपतडागाश्च उद्यानप्रवहास्तथा ।।**
**पुनः पुनश्च संस्कार्यो लभते मौखिकं फलम् ।**
**गुणानां च प्रमाणेन प्रतिमानं विभागतः ।।**[२]

नद्यन्तिके श्मशानसमीपे वा जलाकराणां निर्माणं सर्वथा निषिद्धम्। यत्र जनानां बृहत् समुदायः स्यात् तस्मिन् बृहत्तरे ग्रामे शास्त्रदिशा तडागादीनां निर्माणं कर्त्तव्यम्। यथा–

**विप्रादीनां देवतानां समाजे**
**मेरुस्थाने यत्र तत्रैव कुर्यात् ।**
**नद्यास्तीरे वर्जयेद् वा श्मशाने**
**तडागाद्वै आश्रमादीञ्जनानाम् ।।**[३]

अत्र इदमपि सुस्पष्टं यत् नूतननिर्माणकार्यात् अधिकं पुण्यं संरक्षणेन प्राप्यते। वापी-कूप-तडागादीनामुपरि वासस्थानस्य निर्माणं सर्वथा निषिद्धम्। जलप्रदूषणमपाकर्तुं भविष्यपुराणस्य एतादृशाः निर्देशाः वर्तमानपरिप्रेक्ष्ये महत्वपूर्णाः सन्ति। परोपकाराय देवकार्याय वा जलस्योपयोगः कुलोद्धारकत्वेन अङ्गीकृतः। अस्माकं परम्परायां पर्यावरणसंरक्षणार्थं न केवलं भौतिकोपायानां निर्देशः अपितु आध्यात्मिकोपायाः निर्दिष्टाः। अस्मिन् सन्दर्भे पुराणेषु वर्णितः जलाशयप्रतिष्ठाविधिः महत्त्वपूर्णः इति। अस्माकं संस्कृतौ प्राकृतिकसम्पदः भोगसाधनरूपेण न स्वीक्रियन्ते प्रत्युत् एतासु सर्वत्र देवत्वं कल्पितम्। एवं देवत्वभावनां कृत्वा प्रसादरूपेणोपयोगः सर्वथा संरक्षणानुरूपमेव। प्राकृतिकसम्पदि देवत्वमेतदर्थमुपकल्पितं येनान्धदोहनस्थाने विवेकपूर्णं नियन्त्रितं सेवनं स्यात्।

प्रकृत्याः अपरं वरदानं वृक्षरूपेण यत् प्राप्तं तस्मिन् विषयेऽपि भविष्यपुराणे विस्तृता चर्चा प्राप्यते। वनादनन्तरमुद्यानमेव एतादृशं निरापदं स्थानं भवति यत्रानेकानां वृक्षाणां सानिध्यमवाप्यते। उद्याननिर्माणसम्बद्धाः विषयाः पुराणवाङ्मये प्राचुर्येण चर्चिताः। अस्मिन् क्रमे भूमिपरीक्षण-पादपसंरोपण-संरक्षणादिनियमानां विस्तृतं विवेचनं प्राप्यते । भूमिपरीक्षणविषये उल्लिखितमस्ति यत् उद्यानस्य संरोपणात् पूर्वं दिनत्रयं यावत् कृष्णवृषेण भूम्याः कर्षणमपेक्ष्यते[४]। ततः परं तत्र सप्तधान्यस्य वपनं कार्यम्, यदा त्रीणि पञ्च सप्तदिनान्तराले अङ्कुरितानि भवन्ति तदा यथाक्रमं सा भूमिः उत्तमा, मध्यमा, अधमा वा

भवति। भूमिपरीक्षणादनन्तरमेव कूपारामादीनां निर्माणं कर्त्तव्यम्। समस्तेषु निर्माणकार्येषु विधिपूर्वकं वास्तुदेवतायाः पूजनमपि अपेक्षितम्। कीदृशस्य पादपस्य कुत्रारोपणं कर्त्तव्यमित्यपि पुराणवाङ्मये निर्दिष्टमस्ति। नदीतटे देवालये राजमार्गे वा छायायुक्तानां वृक्षाणां विधिपूर्वकं संरोपणं पुण्यदायकं निगदितम्। यथा-

**नदीतीरेश्मशाने वा स्वगृहस्य च दक्षिणे ।**
**तुलसीरोपणं कृत्वा याति कर्ता यमालयम् ।**
**पत्रपुष्पफलानां च रजोरेणुसमागमाः ।**
**पोषयन्ति च पितरं प्रत्यहं प्रतिकर्मणि ।।**
**यंस्तु वृक्षं प्रकुरुते छायापुण्यफलोपगम् ।**
**पथि देवालये चापि पापात्तारयते पितृन् ।।**
**कीर्तिश्च मानुषे लोके प्रत्यभ्येति शुभं फलम् ।**
**अतीतानागताश्चातः पितृन्स स्वर्गतो द्विजाः ।।**
**तारयेद् वृक्षरोपी च तस्माद्वृक्षं प्ररोपयेत् ।**
**अपुत्रस्य हि पुत्रत्वं पादपा इह कुर्वते ।।**[५]

यद्यपि पुत्रेण लोकान् जयति इति सनातनी श्रुतिः तथापि पुत्राभावेऽपि वृक्षाणां साहाय्येन लोकद्वयं साधयितुं शक्यते। पुत्राभावेऽपि वृक्षाः लौकिकं पारलौकिकं कार्यद्वयमपि साधयन्ति। अनेनैव कार्येण एकस्य अश्वस्थवृक्षस्य रोपणं लक्षपुत्रोत्पादनादपि श्रेष्ठं स्वीकृतम्। स्वस्य जीवने एकस्य एकाधिकस्य वा वृक्षस्य संरोपणमवश्यमेव करणीयम्। एतत् कथनं जनसाधारणस्य चेतसि आकर्षणोत्पादनदृष्ट्या महत्वपूर्णं वर्तते[६]। मनुष्याणामुपरि वृक्षकृतप्रभावस्य विस्तृता चर्चा अपि अस्मिन् पुराणे अवाप्यते। यथा अशोकः शोकनाशकः, विल्वः आयुर्वर्धकः, वकुलः रोगनाशकः, तिनिशः बलबुद्धिदायकः, शमी रोगनाशकः, पनसः मन्दबुद्धिकारकः भवति[७]। भविष्यपुराणानुसारं वृक्षारोपणस्य कृते वैशाख-आषाढ-भाद्रपदप्रभृति मासाः प्रशस्ताः। अत्रैव वृक्षसंरक्षणदृष्ट्यापि महत्त्वपूर्णाः निर्देशाः प्रदत्ताः सन्ति।

यथा उद्याने कूपस्य निर्माणमवश्यमेव स्यात्। तुलसीवने न किमपि यज्ञकार्यं भवेत्। यथा –

**वैशाखे कीर्तिमाप्नोति ज्येष्ठे तु मरणं व्रजेत् ।**
**आषाढे कीर्तिमाप्नोति श्रावणे परमां गतिम् ।**
**भाद्रे धनागमश्चैव आश्विने कार्तिके क्षयः ।।८**

**न कूपमुत्सृजेज्जातु वृक्षमार्गे कथञ्चन ।**
**तुलसीवनभागे तु न चान्यं यागमाचरेत् ।।**[९]

वृक्षाणां छेदनस्य या अन्धा प्रवृत्तिः तामपाकर्तुं पारलौकिकं भयमपि चर्चितं विद्यते। अश्वत्थ-व–विल्वादिवृक्षाणां छेदकः ब्रह्मघातीति पदेनाभिधीयते। कस्यापि वृक्षस्य छेदकः मूकः व्याधिशतपीडितः च भवति। अश्वत्थवृक्षं परितः दशहस्तपरिमितं भूक्षेत्रं पुरुषोत्तमक्षेत्रं स्वीक्रियते।

भविष्यपुराणे वृक्षाणां सम्यग्विकासार्थं यत्नाः समुपवर्णिताः सन्ति। यथा तिन्तणीकबीजानां इक्षुदण्डैः साकं परिपेषणं विधाय जलेन सम्मिश्रणं कृत्वा सिञ्चनेन अशोकवृक्षस्य विकासः जायते। नारिकेलफलाम्बु मधु च जलेन सम्मिल्य परिसिञ्चनेन आम्रवृक्षस्याभिवृद्धिः भवति। यथा –

**रोहिमत्स्यस्य पित्तानि धान्याकं तत्र स्थापयेत् ।**
**तेनोदकादिसेकश्च कृतो वै वृद्धिमादिशेत् ।।**
**तिन्तिणीबीजमादाय इक्षुदण्डेन मर्दयेत् ।**
**तेनाशोके प्रसेकः स्यात् सहकारस्य वृद्धिमान् ।।**
**नारिकेलोदकं चैव माक्षिकैः सह सेचयेत् ।।**[१०]

अश्वत्थ-बिल्व-वट-तुलसी-पूग-वृक्षाणां भवनस्य समीपे प्रतिष्ठा व्यासस्थानस्य समीपे न क्रियते। वृक्षाणां प्रत्यारोपणात् पूर्वं तेषां कर्णभेदसंस्कारस्यापि विधानं वर्णितं विद्यते। यस्मात् कारणात् इमे वृक्षाः पर्यावरणस्य संरक्षणे सहायकाः भवन्ति।

भविष्यपुराणे भूमिप्रदूषणं दूरीकर्तुं एकः सन्दर्भः प्राप्यते। प्राचीनभारते एतादृशी परम्परा आसीत् यत् समस्तेषु ग्रामेषु नगरेषु च गोचरभूमिः उत्सर्जिता भवति स्म। तत्र गावः स्वच्छन्दतया विचरन्ति स्म। सर्वसाधारणजनानां कृते तस्योपयोगः सर्वथा निषिद्धः। तत्र केवलं बालकानां क्रीडा एव विहिता। परन्तु वर्तमानसमये मनुष्याणामनियन्त्रित-वृद्धिकारणात् लोभवशात् च गोचरभूमिः प्रायः विलुप्ता। येन न केवलं गोधनस्य महती क्षतिः संजाता अपितु अतिवृष्टि-अनावृष्टि-भूकम्पनादिदैवीनाम् आपदामपि प्रकोपः वर्धितः। भरणपोषणव्यवस्थाभावे गोवंशो विलुप्तप्रायः वर्तते। रासायनिकोर्वरकाणां प्रयोगेण कृषिभूमिः मरुभूमिषु परिवर्तमाना दृश्यते। यन्त्राकर्षणेन कृषिक्षेत्रस्य उर्वराशक्तिरपि उत्तरोत्तरह्रासोन्मुखी भवति। गोचरभूमिसाहाय्येन अदुग्धदोहां गवां वृद्धवृषभाणां प्रजननाक्षमधेनूनां संरक्षणं भवितुमर्हति। अयं गोवंशः न तु भाररूपः यतो हि दुग्धाभावेऽपि एतेषां गोमयगोमुत्रेणापि उर्वरकस्य कीटनाशकौषधस्य निर्माणं भवितुं शक्यते येन रासायनिकोर्वरकाणां व्ययः

न्यूनीकर्तुं पार्यते। भविष्यपुराणे गोचरभूम्युत्सर्गस्य महत्पुण्यं निगदितम्। अत्र न केवलं गोचरभूमेः व्यवस्था विहिता अपितु तस्याः स्वरूपस्य संरक्षायाः अपि सुन्दरं विवेचनं कृतम्। गोचरभूमेः क्षेत्रसीमां निश्चित्य तस्याः रक्षणार्थं पूर्वदिशि सघनवृक्षाणां रोपणम्, दक्षिणदिशि केदारस्य, सेतोः वा निर्माणं पश्चिमदिशि सघनवृक्षाणां रोपणम्, दक्षिणदिशि कूपस्य निर्माणं विहितम्। अनेन अस्याः भूमेः उल्लंङ्घनमतिक्रमणञ्च जटिलं भवति येन तत् क्षेत्रं सुरक्षितं भवति। यथा –

**गोभ्य एषा मया भूमिः सम्प्रदत्ता शुभार्थिना ।**
**एवं निवेदयेद्यस्तु गोप्रचारं समाहितः ।।**
**सः मुक्तः स्वपापेभ्यो विष्णुलोके महीयते ।**
**यावन्ति तृणगुल्मानि सन्ति भूमौ शुभानि च ।**
**तावद्वर्षसहस्राणि स्वर्गलोके महीयते ।**
**पूर्वे सीमां निवध्नीयात् कृत्वा वृक्षस्य रोपणम् ।।**
**सेतुं कृत्वा दक्षिणतः पश्चिमेऽङ्गाररोपणम् ।**
**उत्तरं खानयेत्कूपं तस्य सीमां न लङ्घयेत् ।।**[११]

तस्यां गोचरभूमौ हरितशस्यस्य प्राचुर्येणोपलब्धिः स्यात् इत्यपि व्यवस्था कर्तव्या भवति। ग्रामस्य नगरस्य वा दक्षिणदिशि गोचरभूमिः स्यात्[१२]। पुराणेषु गोचरभूमेः सीमा अपि निधार्रिता परिभाषिता अपि। यत्र शतानां गवाम् एकस्य वृषभस्य च स्वच्छन्दं विचरणं स्यात् सा एव गोचरभूमिः अपेक्षिता भवति। गोचरभूमेः सुरक्षामालक्ष्य पुराणेषु स्पष्टमुल्लिखितं यत् यः कश्चिद् जनः तस्यां भूमौ खननं वपनं कर्षणं निर्माणं वा करोति सः न केवलमात्मानमपितु स्वकीयान् पूर्वजान् अपि पातयति। येन केन कारणेन यदि सा भूमिः विकृता, विनष्टा, दूषिता, तृणप्रजनने अक्षमा वा स्यात् तदा तस्याः पुनः प्रतिष्ठा करणीया । येन अस्याः भूमेः अक्षयत्वं भवेत्। गोचरभूम्युत्सर्जनकर्ता भूम्युत्सर्जनकाले उत्सर्जितभूमौ निवसन् क्रियमाणानाम् आकीट-पशु-मानवानां कल्याणाय ईश्वरं प्रार्थयति। यथा –

**मानुषाः पशवश्चैव ये निवसन्तीह मण्डपे ।**
**स्वस्ति चास्तु सदा तेषां त्वत्प्रसादात्किल प्रभो ।।**[१४]

एतदतिरिच्य भविष्यमहापुराणे पर्यावरणसंरक्षणदृष्ट्या दिव्यभौमान्तरिक्षजन्याना-मुत्पातानां चर्चा तथा च तच्छमनाय उपायाः निर्दिष्टाः। अस्माकं पर्यावरणप्रभावकर्त्री विशिष्टा सूर्यशक्तिरपि विशेषेण परिचर्चिता वर्तते भविष्यपुराणे। सूर्यप्रभावाणां

तज्जनितप्राकृतिकपरिवर्तनानाम् अनुकूलप्रभावोत्पादकभौतिकाध्यात्मिकोपायानां तेषु वनस्पति-फल-पुष्पादीनां प्रयोगस्य महती चर्चा अपि अवाप्यते [१५]।

समासतः पुराणवाङ्मये पर्यावरणसंरक्षणोपायानां वर्णनसन्दर्भे भविष्यपुराणं महत्वपूर्णं स्थानं च भजते। पर्यापरणस्य शुद्ध्यर्थमनेकानां यज्ञानुष्ठानानामपि विधानं विहितम्। इष्टापूर्त्तकर्म अपि पर्यावरणसंरक्षणे स्वयोगदानं साधयतीति शम्।

**सन्दर्भसूची -**


१.नागप्रकाशकेन प्रकाशिते भविष्यपुराणे मध्यमपर्वणि, पूर्वभागे- ९/१तः५

| | | | | | |
|---|---|---|---|---|---|
| २. | " " | " | " | " | ९/२३तः २५ |
| ३. | " " | " | " | " | ९/३६ |
| ४. | " " | " | " | " | १०/३ |
| ५. | " " | " | " | " | १०/३३तः३६ |
| ६. | " " | " | " | " | १०/३८तः३९ |
| ७. | " " | " | " | " | १०/तः ४९ |
| ८. | " " | " | " | " | १०/५७तः ५८ |
| ९. | " " | " | " | " | ११/३ |
| १०. | " " | " | " | " | १०/६४तः ६५ |
| ११. | " " | " | " | तृतीयभागे | २/१३तः १६ |
| १२. | " " | " | " | " | २/१८ |
| १३. | " " | " | " | " | २/१९ |
| १४. | " " | " | " | " | २/४२ |
| १५. | " " | " | " | " | २० सम्पूर्णम् |



*सहाचार्यः, (पुराणेतिहासविभागः)*
*राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)*
*श्रीसदाशिवपरिसरः, पुरी*

**अष्टाध्यायीसूत्रसङ्ख्याकानुचिन्तनम्** - डॉ. युधिष्ठिरसाहुः - ५-११

**प्रेतादिदेहसम्बन्धाः -** डा.उमाराहुल

**श्रीमद्भगवद्गीतादर्शनम् -** डॉ. युधिष्ठिरसाहुः

**भविष्यपुराणे पर्यावरणचिन्तनम् -** डॉ. मखलेशकुमारः